# केरलपाठावलिः
# संस्कृतम्

## नवमी कक्ष्या

अक्कादमिक-संस्कृतविद्यालयानां कृते

# KERALA READER SANSKRIT

## STANDARD
## 9

For Academic and Sanskrit Schools

Government of Kerala

Department of Education

2016

# राष्ट्रगीतम्

जनगण मन अधिनायक जय हे
भारत भाग्यविधाता।
पंजाब सिन्ध गुजरात मराठा
द्राविड उत्कल बंगा।
विन्ध्य हिमाचल यमुना गंगा
उच्छलजलधि तरंगा।
तव शुभ नामे जागे
तव शुभ आशिष मागे
गाहे तव जय-गाथा।
जनगण मंगलदायक जय हे
भारत भाग्यविधाता
जय हे जय हे जय हे
जय जय जय जय हे।

# प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।

अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च।

मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

**State Council of Educational Research and Training (SCERT)**
Poojappura, Thiruvananthapuram 695012, Kerala
Website: www.scertkerala.gov.in
email: scertkerala@gmail.com
Phone:0471-2341883, fax;0471-231869
Typesetting and Layout: SCERT
Printed at : KBPS, Kakkanad, Kochi-30
Department of Education, Government of Kerala

# भूमिका

प्रियच्छात्राः !

परिष्कृता अस्माकं पाठ्यपद्धतिः प्रवर्तनाधिष्ठिता छात्रकेन्द्रीकृता च भवति। छात्राणां सर्वतोमुखं विकासमेव अस्याः पद्धतेः लक्ष्यम्। तदनुसारमेव पाठ्यक्रमः स्वीकृतः। पाठ्यक्रमे पाठपुस्तकस्य अद्वितीयं स्थानमस्ति। स्वयं पठनाय सङ्घपठनाय भाषानैपुणीनां विकासाय च पाठपुस्तकमुपकरोति।

अष्टमकक्ष्याया अनुस्यूततया एवास्य पुस्तकस्य रचना प्रवृत्ता। विविधानां व्यवहाररूपाणां परिचायनाय पुस्तकेऽस्मिन् पठनसन्दर्भाः आयोजिताः। पठितानामाशयानां द्रढीकरणाय नूतनसन्दर्भेषु प्रयोगाय स्वयं मूल्यनिर्णयाय चावकाशः यथायोग्यं दत्तः।

पुस्तकेऽस्मिन् पञ्च एककानि सन्ति। विषयानुसारमेव एककानां नामानि। प्रत्येकम् एककस्य प्रारम्भे आमुखम् पठनाधिगमाः प्रवेशकप्रवर्तनं च दत्तमस्ति। पाठस्यान्ते प्रवर्तनानि अधिकपठनांशाः चाक्रिकारोहणप्रक्रिया च दत्ताः। पाठभागे अधिकसूचनार्थं केचन भागाः प्रत्येकं पङ्क्तिषु दत्ताः। एष भागः अधिकांशस्वीकाराय एव न तु मूल्यनिर्णयाय। एककानामन्ते शब्दकोशः पृथक् दत्तः। पाठभागेष्वागतानां व्याकरणांशानां विवरणं यथास्थानं दत्तमस्ति।

भाषापठनमनायासं सुखप्रदं च कर्तुं पाठपुस्तकमिदं पर्याप्तमिति चिन्तयामि। संस्कृतपठनं सर्वदा मधुरं सफलं च भवतु इति आशास्ये।

डा॰ पि ए फात्तिमा

निदेशका

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्,केरलम्।

## TEXT BOOK DEVELOPMENT COMMITTEE

## SANSKRIT STANDARD IX

### PARTICIPANTS

1 **Dr.T.K.Krishnakumar**, HSA, MIMHSS, Perode, Nadapuram, Kozhikode.
2 **Dr.Sunilkumar Nair K**, HSA, GHS, Thachangad, Kasargod.
3 **Dr.Abhilash.J**, HSST, MKMHSS, Piravam, Ernakulam.
4 **Dr.MaheshBabu.** HSST, S.N.GHSS, Nadavarambu, Thrissur.
5 **Deviprasad.A**, HSST, AIJMHSS, Kottiyoor, Kannur.
6 **Jose S**, HSA,GHS, Mezhathur, Palakkad.
7 **Manoj K.V**, HSA,Koodali HSS, Koodali,Kannur.
8 **Neelakandan P.M**, HSA, St.Mary's HSS, Edoor, Kannur.
9 **K.G.Ramabai,** (Rtd.) HSA, GHSS Pallikkunnu, Kannur.
10 **Sabarees.M,** HSA, HSS, Mundur, Palakkad.
11 **Sajikumar A.V**, HSST, GHSS, Karupadanna, Thrissur.
12 **Sreekumr C.R**,HSA, Ramavilasam HSS Chokli, Thalassery, Kannur.
13 **Sreekumar S,** HSA, PPMHSS, Karakkonam, Thiruvananthapuram.

### EXPERTS

1 **Dr. T.D.Suneethi Devi,** Special Officer (Sanskrit) DPI Tvm.
2 **Dr.G.Sahadevan,** (Rtd.) Prof. in Sanskrit, University College,Tvm.
3 **Dr. K.Mohandas,** Sr.Lect.DIET(Rtd.) UCTE Moovaattupuzha.
4 **V. Madhavan Pillai** ,(Rtd.) Prof.in Sanskrit, Govt.College for Women,Tvm.
5 **N.K.Ramachandran**, (Rtd.) DEO Wayanad.

### ARTISTS

1 **Sreedharan T.P,** Drawing Teacher, Ramavilasam HSS Chokli, Kannur.
2 **Varghese Kalathil**, Drawing Teacher, GHSS,Pallikku nnu, Kannur.

### LAYOUT & GRAPHICS

**Sreedharan T.P,** Drawing Teacher, Ramavilasam HSS Chokli,Kannur.

### ADVISOR

**Dr. Prof.Vasudevan Potti.R**, (Rtd.)Govt.Sanskrit College,Thiruvananthapuram.

### ACADEMIC CO-ORDINATOR

**Dr. Shameeja.P,** Research Officer (Sanskrit) SCERT, Kerala.


राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलाः
STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING , KERALA

## विषयानुक्रमणिका


| | एककम् | | पाठस्य नाम | व्यवहाररूपम् | पुटसंख्या |
|---|---|---|---|---|---|
| I | मुकुलम् | १ | अमृतबिन्दवः। | (सुभाषितानि)। | ८ |
| | | २ | प्रलोभनादुत्सर। | (कथा)। | २१ |
| | | ३ | माकन्दमञ्जरी। | (गीतकम्)। | २७ |
| II | दलम् | ४ | क्रियावान् पुरुषो विद्वान्। | (कथा)। | ४० |
| | | ५ | श्रियो मूलमनिर्वेदः। | (काव्यम्)। | ४६ |
| III | मकरन्दः | ६ | विगणितं वा गणितम्। | (उपन्यासः)। | ६८ |
| | | ७ | वसन्तागमः। | (काव्यम्)। | ७२ |
| | | ८ | शास्त्रं विज्ञानपूर्त्तये। | (विवरणम्)। | ८३ |
| IV | परागः | ९ | वंशानुचरितम्। | (चरित्रकाव्यम्)। | ९४ |
| | | १० | आत्मबोधो विमुक्तये। | (जीवचरितम्)। | १०३ |
| V | स्तबकः | ११ | श्लाघ्यं कलापैतृकम्। | (चरित्रकाव्यम्)। | ११४ |
| | | १२ | शरणागतरक्षणम् | (नाटकम्)। | ११९ |

## पुस्तकसंरक्षणम्

‘तैलाद्रक्ष जलाद्रक्ष रक्ष मां श्लथबन्धनात्।
परहस्तगताद्रक्ष’- नित्यं रोदिति पुस्तकम्।।

## संस्कृतभाषा

भाषासु मधुरा रम्या हृद्या गीर्वाणभारती

## विद्यायाः महत्वम्

सर्वेषां शोभमानानां शोभनतमा विद्या

### आमुखम्

संस्कृतमहोद्याने विकसन्ति कुसुमानि भवेम वयम्। तादृशानां कुसुमानां मुकुलायमानं भवति इदमेककम्। अस्मिन् त्रयः पाठाः समायोजिताः। अमृतबिन्दवः इति पाठः सुभाषितानां सञ्चयः, प्रलोभनादुत्सरेति पाठः हितोपदेशकथा, तथा माकन्दमञ्जरीति पाठः अनूदितगीतकञ्च भवति।

## एककम् १

# मुकुलम्



**पठनाधिगमाः**

- ☐ सुभाषितानि सतालमालपति।
- ☐ सुभाषितानाम् आशयं ज्ञात्वा लिखति।
- ☐ अन्वयम् अन्वयार्थञ्च लिखति।
- ☐ समानाशययुक्तं श्लोकं गीतं वा लिखति।
- ☐ कथाभागं सस्वरं भावात्मकतया स्पष्टतया च कथयति।
- ☐ सूचनानुसारं कथां लिखति।
- ☐ कथापात्राणां सम्भाषणं सम्भाव्य लिखति।
- ☐ कथायाः सारांशं लिखित्वा अवतारयति।
- ☐ कवितां कथारूपेण परिवर्त्य लिखति।
- ☐ आस्वादनटिप्पणीं लिखति।
- ☐ सतिसप्तमीमुपयुज्य वाक्यं परिवर्तयति।

**प्रवेशकः** - **सज्जनप्रशंसापराणि सुभाषितानि सञ्चिनुत।**

पाठः १

# अमृतबिन्दवः



## आमुखम्

संस्कृतभाषा संस्कृतिवाहिनी भवति। तस्याम् उपदेशपराणि, संस्कारद्योतकानि च बहूनि सुभाषितानि सन्ति । भारतीयसंस्कृतेः पालनपोषणप्रसारणेषु संस्कृतभाषायाः योगदानं महदेव । वसुधैव कुटुम्बकम् , मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव इत्याद्याः सूक्तयः भारतीयसंस्कृतेः महिमानम् उद्घोषयन्ति । विक्रमचरितं, चाणक्यनीतिः, विक्रमाङ्कदेवचरितं, सुभाषितभण्डागारं, पद्मपुराणं, नीतिशतकम् इत्यादिभ्यः प्रशस्तसुभाषितग्रन्थेभ्यः च स्वीकृतानि कानिचन सुभाषितानि अत्र दत्तानि। तानि धर्माचरणाय अर्थसमाहरणाय, कर्तव्यपालनाय, सन्मार्गानुसरणाय च छात्रान् प्रेरयन्ति ।

**प्रथमवयसि दत्तं तोयमल्पं स्मरन्तः**
**शिरसि निहितभाराः नारिकेला नराणाम् ।**
**सलिलममृतकल्पं दध्युराजीवनान्तं**
**न हि कृतमुपकारं साधवो विस्मरन्ति।। 1**

(विक्रमचरितम्)

**पदच्छेदः**

| | | |
|---|---|---|
| साधवो विस्मरन्ति | - | साधवः + विस्मरन्ति। |
| नारिकेला नराणाम् | - | नारिकेलाः + नराणाम्। |
| दध्युराजीवनान्तम् | - | दध्युः + आजीवनान्तम्। |

**विग्रहः**

| | | |
|---|---|---|
| निहितभाराः | - | निहितः भारः येषां ते । |
| अमृतकल्पम् | - | अमृतेन तुल्यम् |
| आजीवनान्तम् | - | जीवनान्तं यावत्। |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| प्रथमवयसि दत्तम् | बाल्यकाले सिक्तं पीतं वा स्वीकृतम् । |
| अल्पं तोयं स्मरन्तः | जललेशमपि स्मरन्तः । |
| नारिकेलाः | नालिकेरवृक्षाः । |
| शिरसि निहितभाराः | मूर्धनि धृतफलाः । |
| नराणां(कृते) | मनुष्याणां (कृते) । |
| अमृतकल्पं सलिलम् | अमृततुल्यं जलम् । |
| आजीवनान्तम् | जीवितपर्यन्तम् । |
| दध्युः | वहेयुः । |

| | |
|---|---|
| साधवः | सज्जनाः । |
| कृतमुपकारम् | कृतोपकृतिं |
| न विस्मरन्ति | विस्मरणं न कुर्वन्ति। |

**भावार्थः**

बाल्यकाले (रोपणसमये) सिक्तम् अल्पमात्रं जलं स्मरन्तः नारिकेलवृक्षाः मनुष्याणां कृते आजीवनम् अमृततुल्यं स्वादिष्ठं जलं वहेयुः । सज्जनाः अन्यैः कृतम् उपकारम् आजीवनं न विस्मरन्ति इत्यर्थः ।

**कोशः**

तोयम् - अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम् ।।

नरः - मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ।
स्युः पुमांसः पञ्चजनाः विदुषा पूरुषा नरः ।।

नारिकेलः - नालिकेरस्तु लाङ्गली ।

साधुः - महाकुलकुलीनार्यः सभ्यसज्जनसाधवः ।

**क्रियापदानि**

दध्युः - डुधाञ् धारणपोषणयोः दाने च परस्मैपदी विधिलिङ् प्र. पु. ब. व।

विस्मरन्ति - वि + स्मृ चिन्तायां लट् परस्मैपदी प्र. पु. ब. व ।

**व्याकरणांशः**

अमृतकल्पम् - यस्य विग्रहवाक्ये समसनाय दत्तानि पदानि विहाय पदान्तरं प्रयुज्यते तत्र अस्वपदविग्रहः भवति । यथा - अमृतेन तुल्यम् अमृतकल्पम्। अत्र तुल्यार्थे **कल्पप्** प्रत्ययः ।

**कुचेलिनं दन्तमलोपधारिणं**
**बह्वाशिनं निष्ठुरवाक्यभाषिणम्।**
**सूर्योदये चास्तमये च शायिनं**
**विमुञ्चति श्रीरपि चक्रपाणिनम् ।। 2** (चाणक्यनीतिः)

**पदच्छेदः**

| | | | | |
|---|---|---|---|---|
| चास्तमये | - | च | + | अस्तमये |
| श्रीरपि | - | श्रीः | + | अपि |

**विग्रहः**

| | | |
|---|---|---|
| कुचेलिनम् | - | कुत्सितं चेलं यस्य सः कुचेली , तम् । |
| दन्तमलोपधारिणम् | - | दन्तेषु मलम् उपधरति इति दन्तमलोपधारी, तम् । |
| बह्वाशिनम् | - | बहु अश्नाति इति बह्वाशी, तम् । |
| निष्ठुरवाक्यभाषिणम् | - | निष्ठुरं वाक्यं भाषितुम् शीलम् अस्य इति निष्ठुरवाक्यभाषी, तम् । |
| शायिनम् | - | शेतुं शीलम् अस्य अस्ति इति शायी , तम् । |
| चक्रपाणिनम् | - | चक्रं पाणौ यस्य सः चक्रपाणी, तम् । |

| अन्वयः | अन्वयार्थः |
|---|---|
| कुचेलिनम् | मलिनवस्त्रधारिणम् |
| दन्तमलोपधारिणम् | दन्तशुद्धीकरणे विमुखम् |
| निष्ठुरवाक्यभाषिणम् | क्रूरसम्भाषणं कुर्वन्तम् |
| बह्वाशिनम् | अमितभक्षणशीलवन्तम् |
| सूर्योदये अस्तमये च | सूर्यस्य उदये अस्तमये च |
| शायिनम् | शयनशीलम् |
| चक्रपाणिनम् अपि | विष्णुम् अपि |
| श्रीः | लक्ष्मीदेवी |
| विमुञ्चति । | त्यजति । |

**भावार्थः**

मलिनवस्त्रधारिणं, दन्तशुद्धीकरणे विमुखम्, अमितभक्षणशीलवन्तं, क्रूरभाषणं कुर्वन्तं प्रभाते प्रदोषे च शयानं पुरुषोत्तमं भगवन्तं विष्णुम् अपि लक्ष्मीदेवी परित्यजति इत्यर्थः ।

**कोशः**

| | | |
|---|---|---|
| चेलम् | - | वस्त्रमाच्छादनं वासश्चेलं वसनमंशुकम्। |
| दन्तः | - | रदना दशना दन्ता रदाः। |

श्रीः - लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया ।
इन्दिरा लोकमाता मा रमा मङ्गलदेवता।
भार्गवी लोकजननी क्षीरसागरकन्यका ।।

चक्रपाणिः - उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः ।

**क्रियापदम्**

विमुञ्चति - वि पूर्वक मुच्लृ मोक्षणे लट् परस्मैपदी प्र. पु. ए. व।

**उदयति यदि भानुः पश्चिमे दिग्विभागे**
**प्रचलति यदि मेरुः शीततां याति वह्निः ।**
**विकसति यदि पद्मं पर्वताग्रे शिलायां**
**न भवति पुनरुक्तं भाषितं सज्जनानाम् ।।** 3

(विक्रमाङ्कदेवचरितम्)

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| यदि भानुः | यदि सूर्यः । |
| पश्चिमे दिग्विभागे | प्रतीच्यां दिशि । |
| उदयति | आविर्भवति । |
| (यदि) मेरुः प्रचलति | यदि सुमेरुपर्वतः चलति (सञ्चरति)। |
| (यदि) वह्निः शीततां याति | यदि अग्निः शैत्यं प्राप्नोति । |
| (यदि)पद्मं पर्वताग्रे शिलायां विकसति | यदि नलिनं पर्वताग्रे शिलातले प्रफुल्लति। |
| सज्जनानां भाषितम् | महद्वचनम् । |
| पुनरुक्तं न भवति | द्विरुक्तं न भवति (पुनः पुनः न वदति इति)। |

**भावार्थः**

सूर्यः प्रतीच्याम् उदयति । अचलः सुमेरुः चलति। अग्निः शैत्यं प्राप्नोति। नलिनं पर्वताग्रे शिलातले प्रफुल्लति। एतत् सर्वम् असम्भाव्यं खलु? यद्यपि तत्सर्वं सम्भवति तथापि सज्जनानां कथितं द्विरुक्तं न भवति । सज्जनाः उक्तात् न व्यतिचलन्तीत्यर्थः।

### कोशः

| | | |
|---|---|---|
| भानुः | - | भानुर्हंससहस्रांशुः सविता तपनो रविः। |
| मेरुः | - | मेरुः सुमेरुः हेमाद्रिः रत्नसानुसुरालयः । |
| वह्निः | - | अग्निर्वैश्वानरोवह्निर्वीतिहोत्रो धनञ्जयः । |
| पद्मम् | - | वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् । |
| शिला | - | पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत् । |

### क्रियापदानि

| | | |
|---|---|---|
| उदयति | - | उद्पूर्वक अय गतौ लट् परस्मैपदी प्र. पु. ए. व। |
| प्रचलति | - | प्र पूर्वक चल गतौ लट् परस्मैपदी प्र. पु. ए. व। |
| विकसति | - | वि + कस् गतौ लट् परस्मैपदी प्र. पु. ए. व। |

**दधि मधुरं मधु मधुरं**
**द्राक्षा मधुरा सुधापि मधुरैव ।**
**तस्य तदेव हि मधुरं**
**यस्य मनो यत्र संलग्नम् ।। 4** (सुभाषितभण्डागारम्)

### पदच्छेदः

| | | | |
|---|---|---|---|
| सुधापि | सुधा | + | अपि |
| मधुरैव | मधुरा | + | एव |
| मनो यत्र | मनः | + | यत्र |

| अन्वयः | अन्वयार्थः |
|---|---|
| दधि मधुरम् | पयस्यं स्वादिष्ठम् । |
| मधु मधुरम् | पुष्परसं स्वादिष्ठम् । |
| द्राक्षा मधुरा | द्राक्षाफलं मधुरम् । |
| सुधापि मधुरा | अमृतम् अपि मधुरम् । |

| | |
|---|---|
| यस्य मनः यत्र संलग्नम् | यस्य पुरुषस्य मनः यस्मिन् विषये आसक्तम् । |
| तस्य तदेव मधुरम् (भवति)। | तस्य तदेव आस्वाद्यतरं भवति। |

**भावार्थः**

दधि, मधु, द्राक्षाफलम्, अमृतम् इत्यादीनि मधुररसयुक्तानि भवन्ति। वस्तुतः विविधरसेषु सत्स्वपि यस्य मनः यस्मिन् विषये आसक्तं भवति तस्य तदेव मधुरं(आस्वाद्यतरम्)भवति।

**कोशः**

द्राक्षा - मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च।

सुधा - पीयूषममृतं सुधा ।

मनः - चित्तन्तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ।

**वनेऽपि दोषाः प्रभवन्ति रागिणां**
**गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः ।**
**अकुत्सिते कर्मणि यः प्रवर्तते**
**निवृत्तरागस्य गृहं तपोवनम् ।।** 5

(पद्मपुराणम्)

**पदच्छेदः**

वनेऽपि - वने + अपि

गृहेऽपि - गृहे + अपि

पञ्चेन्द्रियनिग्रहस्तपः - पञ्चेन्द्रियनिग्रहः + तपः

**विग्रहः**

रागिणः - रागः अस्ति अस्मिन् इति रागी, तस्य ।

अकुत्सिते - न कुत्सितः अकुत्सितः, तस्मिन्।

निवृत्तरागस्य - निवृत्तः रागः यस्मात् सः निवृत्तरागः, तस्य ।

| | | |
|---|---|---|
| तपोवनम् | - | तपसे वनम् । |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| रागिणाम् | विषयासक्तानाम् |
| वनेऽपि | कानने (निवसताम्) अपि |
| दोषाः प्रभवन्ति | रागद्वेषादिदोषाः जायन्ते |
| पञ्चेन्द्रियनिग्रहः | इन्द्रियसंयमनम् |
| गृहेऽपि तपः | भवनेऽपि तपः भवति |
| यः अकुत्सिते कर्मणि प्रवर्तते | यः पुरुषः अधमकर्मणि न प्रवर्तते |
| तस्य निवृत्तरागस्य | रागद्वेषादिविमुक्तस्य तस्य |
| गृहं तपोवनम् (भवति) | भवनं तपोवनं एव । |

**भावार्थः-** रागिणां काननवासेऽपि रागादिदोषाः जायन्ते। जितेन्द्रियाणां स्वस्वगृहवासेऽपि न दोषाः सन्ति। अधमकर्मणि अप्रवृत्तस्य जितेन्द्रियस्य भवनं तपोवनमेव।

**तृणानि नोन्मूलयति प्रभञ्जनो**
**मृदूनि नीचैः प्रणतानि सर्वतः ।**
**समुच्छ्रितानेव तरून् प्रबाधते**
**महान् महत्येव करोति विक्रमम् ।।** 6

(सुभाषितभण्डागारम्)

**पदच्छेदः**

| | | |
|---|---|---|
| नोन्मूलयति | - | न + उन्मूलयति |
| प्रभञ्जनो मृदूनि | - | प्रभञ्जनः + मृदूनि |
| महत्येव | - | महति + एव |

## विग्रहः

प्रभञ्जनः - प्रकर्षेण भञ्जयति वृक्षादीन् इति ।

| अन्वयः | अन्वयार्थः |
| --- | --- |
| प्रभञ्जनः | प्रचण्डो वायुः |
| सर्वतः नीचैः प्रणतानि | सर्वत्र अधस्तात् विनम्राणि |
| मृदूनि तृणानि | लघूनि तृणानि |
| नोन्मूलयति | न नाशयति |
| समुच्छ्रितान् | उन्नतशीर्षान् |
| तरून् एव | वृक्षान् एव (बाधते ) |
| महान् महति एव | बलवान् बलयुक्तेन एव |
| विक्रमं करोति | शूरतां प्रकटयति । |

## भावार्थः

प्रचण्डमारुतः सर्वत्र अधस्तात् विनम्राणि लघूनि तृणानि न नाशयति। सः उन्नतशीर्षान् वृक्षान् एव बाधते। कुत इति चेत् बलवान् शक्तियुक्ते पुरुषे एव पराक्रमं करोति ।

## कोशः

प्रभञ्जनः - समीरमारुतमरुत् जगत्प्राणसमीरणाः ।
नभस्वद्वातपवनपवमानप्रभञ्जनाः ।।

तरुः - वृक्षो महीरुहः शाखी विटपी पादपस्तरुः।

विक्रमम् - शक्तिः पराक्रमप्राणौ विक्रमस्त्वतिशक्तिता ।

## क्रियापदानि

प्रबाधते - प्र पूर्वक बाधृ लोडने लट् आत्मनेपदी प्र. पु. ए. व

उन्मूलयति - उद् + मूल प्रतिष्ठायां लट्. परस्मैपदी प्र. पु. ए. व।

**शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो**
**नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ।**
**व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं**
**सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ।। 7**

(नीतिशतकम्)

**पदच्छेदः**

| | | |
|---|---|---|
| शक्यो वारयितुम् | - | शक्यः + वारयितुम् । |
| व्याधिर्भेषजसंग्रहैश्च | - | व्याधिः + भेषजसङ्ग्रहैः + च । |
| विविधैर्मन्त्रप्रयोगैर्विषं | - | विविधैः + मन्त्रप्रयोगैः + विषम् । |
| सर्वस्यौषधमस्ति | - | सर्वस्य + औषधम् अस्ति । |
| नागेन्द्रो निशिताङ्कुशेन | - | नागेन्द्रः + निशिताङ्कुशेन । |
| समदो दण्डेन | - | समदः + दण्डेन । |
| नास्त्यौषधम् | - | नास्ति + औषधम् । |

**विग्रहः**

| | | |
|---|---|---|
| निशिताङ्कुशेन | - | निशितः च असौ अङ्कुशः च, तेन। |
| नागेन्द्रः | - | नागानां इन्द्रः/ नागेषु इन्द्रः। |
| हुतभुक् | - | हुतं भुनक्ति इति । |
| समदः | - | मदेन सह वर्तत इति । |
| गोगर्दभौ | - | गौश्च गर्दभश्च । |
| शास्त्रविहितं | - | शास्त्रेषु विहितम्। |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| हुतभुक् | अग्निः |
| जलेन | वारिणा |

| | |
|---|---|
| वारयितुं शक्यः | निरोद्धुं योग्यः |
| सूर्यातपः | सूर्यप्रकाशः |
| छत्रेण | आतपत्रेण |
| समदः | मदयुक्तः |
| नागेन्द्रः | गजेन्द्रः |
| निशिताङ्कुशेन | तीक्ष्णेन अङ्कुशेन |
| गोगर्दभौ | धेनुः रासभः च |
| दण्डेन | यष्ट्या |
| व्याधिः | रोगः |
| विविधैः भेषजसंग्रहैः | बहुविधैः औषधैः |
| विषम् | गरलम् |
| मन्त्रप्रयोगैः | मनस्थैर्यादिभिः |
| सर्वस्य शास्त्रविहितम् | सर्वकार्यस्य शास्त्रनिर्दिष्टम् |
| औषधम् अस्ति | भेषजं वर्तते |
| मूर्खस्य | क्षुद्रस्य |
| औषधं नास्ति | दोषनिवारणोपायं न वर्तते। |

**भावार्थः**

लोके अग्निः जलेन, सूर्यप्रकाशः आतपत्रेण, मदगजः अङ्कुशेन, गोगर्दभौ यष्ट्या, आमयः औषधैः, विषं मनोधैर्यवर्धकप्रयोगैः मन्त्रणैः औषधप्रयोगैः च दूरीकर्तुं शक्यते । एवं सर्वस्यापि दोषस्य शास्त्रनिर्दिष्टाः प्रतिविधयः सन्ति । किन्तु मूर्खस्य दोषनिवारणाय यत्र कुत्रापि औषधं नास्ति एव।

**कोशः**

| | | |
|---|---|---|
| आतपः | - | प्रकाशो द्योत आतपः। |
| हुतभुक् | - | हिरण्यरेता हुतभुक् गहनो हव्यवाहनः। |

| | | |
|---|---|---|
| छत्रम् | - | छत्रं त्वातपत्रम् । |
| नागः | - | मदङ्गजो गजो नागकुञ्जरो वारणः करी। |
| गर्दभः | - | रासभा गर्दभाः खराः । |
| व्याधिः | - | रुक्रुजोपतापरोगव्याधिगदामयाः । |
| भेषजः | - | भेषजौषधभैषज्यान्यगदो जायुरित्यपि । |
| मूर्खः | - | अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः । |
| | | कदर्ये कृपण क्षुद्र किंपचानामितंपचाः । |

## पठनप्रवर्तनानि

**सुभाषितानि एकैकशः सङ्घशः च विविधया रीत्या आलपतु ।**

श्रद्धेयाः अंशाः

पदच्छेदः ।

पदार्थज्ञानम् ।

अक्षरस्फुटता ।

उचिततालः ।

**पठितानां श्लोकानां गद्यक्रमं लिखतु ।**

श्रद्धेयाः अंशाः

अन्वयक्रमः ।

आशयक्रमीकरणम् ।

संग्रहः ।

**निर्दिष्टाशययुक्तं श्लोकं पाठभागात् निर्धार्य लिखतु ।**

अ ) सज्जनाः कृतमुपकारं कदापि न विस्मरन्ति ।

आ) सज्जनानां कथितं द्विरुक्तं न भवति।

इ ) बलवान् शक्तियुक्ते पुरुषे एव पराक्रमं प्रकटयति।

ई) मूर्खस्य दोषनिवारणाय औषधं नास्ति।

श्रद्धेयाः अंशाः

आशयावगमनम् ।

श्लोकनिर्धारणम् ।

लेखनम् ।

**पठितानां श्लोकानाम् आशययुक्तानि अन्यानि सुभाषितानि समाहृत्य सम्पुटम् सज्जीकरोतु। कक्ष्यायाम् अवतारयतु ।**

श्रद्धेयाः अंशाः

आमुखम् ।

आशयपूर्णता ।

औचित्यम् ।

*चाक्रिकारोहणप्रक्रिया* - **बुद्धेः महत्वप्रतिपादकं किमपि सुभाषितं लिखित्वा अवतारयतु।**

पाठः २

# प्रलोभनादुत्सर ।

## आमुखम्

संस्कृतसाहित्ये अतिविपुलत्वेन राजमानं वाङ्मयं भवति कथासाहित्यम्। कथाः विनोददायिकाः, उपदेशात्मिकाः , मनोरञ्जिकाः च भवन्ति। सर्वेषां जनानाम् आनन्दं प्रदातुं सन्मार्गे सञ्चारयितुम् ईदृश्यः कथाः उपकुर्वन्ति। तादृश्यः अनेकाः कथाः बृहत्कथायां पञ्चतन्त्रे हितोपदेशे च सन्ति। तेषु ग्रन्थेषु प्रसिद्धः भवति नारायणपण्डितस्य हितोपदेशः। पञ्चतन्त्रस्य प्रभावः हितोपदेशे द्रष्टुं शक्यते। क्रिस्तोः परं चतुर्दशशतके ग्रन्थोऽयं विरचितः इति मन्यते।

पाटलीपुत्रस्य राज्ञः सुदर्शनस्य पुत्राः विद्याविमुखाः, अनधिगतशास्त्राः च आसन्। अत एव ते नित्यम् असन्मार्गिणः आचारहीनाः च अभवन् । राज्ञः निर्देशानुसारं तान् नीतिशास्त्राभिज्ञान् कर्तुं नारायणपण्डितः हितोपदेशकथाः अशिक्षयत् । तासु कथासु पशु-पक्षिणः च कथापात्राणि आसन् । ततः झषबककथा पाठभागत्वेन स्वीकृता।



भक्षयित्वा बहून्मत्स्यानुत्तमाधममध्यमान्।
अतिलोभाद्बकः पश्चान्मृतः कर्कटकग्रहात्।।

मालवदेशे पद्मगर्भनामधेयं सरः अस्ति। तत्रैको वृद्धो बकः सामर्थ्यहीनः उत्कण्ठाकुलमिवात्मानं स्थितः। स च केनचित्कुलीरेण दृष्टः पृष्टश्च - किमिति भवानाहारत्यागेन तिष्ठति ? बकेनोक्तम् - 'मत्स्याः मम जीवनहेतवः। ते कैवर्तैरागत्य व्यापादयितव्याः इति वार्ता नगरोपान्ते मया श्रुता । अतो वर्तमानाभावादेव अस्मन्मरणमुपस्थितमिति ज्ञात्वा आहारेऽप्यनादरः कृतः'। तच्छ्रुत्वा मत्स्यैरालोचितम्- इह अस्मिन् समये तावदुपकारक एवायं लक्ष्यते । तदयमेव यथाकर्तव्यं पृच्छ्यताम्। तथा चोक्तम् -

उपकर्त्रारिणा सन्धिर्न मित्रेणापकारिणा ।
उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ।।

मत्स्याः ऊचुः - 'भो बक! कोऽत्र रक्षणोपायः?' बको ब्रूते – 'रक्षणोपायोऽस्ति। जलाशयान्तराश्रयणम्। तत्राहमेकैकशो युष्मान्नयामि'। मत्स्या आहुः - 'एवमस्तु'। ततोऽसौ बकः तान् मत्स्यानेकैकशो नीत्वा खादति स्म। अनन्तरं कुलीरस्तमुवाच- 'भोः बक ! मामपि तत्र नय'। ततो बकोऽप्यपूर्वकुलीरमांसार्थी सादरं तं स्कन्धमारोप्य नीतवान्। कुलीरः मत्स्यकण्टकाकीर्णं तत्स्थलमालोक्य अचिन्तयत् - हा हतोऽस्मि मन्दभाग्यः। भवतु इदानीं समयोचितं व्यवहरिष्यामि इत्यालोच्य कुलीरस्तस्य ग्रीवां चिच्छेद। स बकः पञ्चत्वं गतः । यः बहुवारम् अन्यान् वञ्चयति सः एकस्मिन् दिने गृह्यते।

विश्वासो नैव कर्तव्यो
मधुरासु खलोक्तिषु।
स्मर मूषकमार्जार-
झषबककथास्तथा।।

**पदच्छेदः**

| | | |
|---|---|---|
| उपकर्त्रारिणा | - | उपकर्त्रा + अरिणा । |
| पश्चान्मृतः | - | पश्चात् + मृतः । |
| तत्रैकः | - | तत्र + एकः । |
| बकेनोक्तम् | - | बकेन + उक्तम् । |
| कैवर्तैरागत्य | - | कैवर्तैः + आगत्य । |
| आहारेऽप्यनादरः | - | आहारे + अपि + अनादरः । |
| मत्स्यैरालोचितम् | - | मत्स्यैः + आलोचितम् । |
| तत्राहमेकैकशः | - | तत्र + अहम् एकैकशः । |
| ततोऽसौ | - | ततः + असौ । |
| कुलीरस्तमुवाच | - | कुलीरः + तम् उवाच । |
| बकोऽप्यपूर्वकुलीरमांसार्थी | - | बकः + अपि + अपूर्वकुलीरमांसार्थी। |

## विग्रहः

| | | |
|---|---|---|
| हितोपदेशः | - | हितानि उपदिशति इति हितोपदेशः। |
| कण्टकाकीर्णः | - | कण्टकैः आकीर्णः । |
| व्यापादितव्यः | - | व्यापादयितुं योग्यः । |
| जलाशयान्तरम् | - | अन्यः जलाशयः । |

## धातुपरिचयः

| | | |
|---|---|---|
| पृच्छ्यताम् | - | प्रच्छि ज्ञीप्सायां कर्मणि आत्मनेपदी.लोट् प्र. पु. ए. व । |
| ऊचुः | - | ब्रूञ् व्यक्तायां वाचि परस्मैपदी. लिट् . प्र. पु. ब. व । |
| ब्रूते | - | ब्रूञ् व्यक्तायां वाचि आत्मनेपदी. लट् प्र. पु. ए. व । |
| चिच्छेद | - | छिदिर् द्वैतीभावे परस्मैपदी. लिट् प्र. पु. ए. व । |

## कोशः

| | | |
|---|---|---|
| झषः | - | पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः इत्यमरः । |

## पठनप्रवर्तनानि

**कथाभागं भावानुसारम् अवतारयतु।**

श्रद्धेयाः अंशाः

आशयावगमनम् ।

आशयव्यक्तता ।

शैली।

**कथायाः सारांशं संगृह्य लिखतु।**

श्रद्धेयाः अंशाः

आशयावगमनम्।

संग्रहसामर्थ्यम्।

आशयलेखनम्।

**कथास्तम्भं क्रमीकरोतु।**

खलोक्तिषु विश्वासो नैव कर्तव्यः।

मालवदेशे पद्मगर्भनामधेयं सरः अस्ति।

भो बक! कोऽत्र रक्षणोपायः।

कुलीरः बकस्य ग्रीवां चिच्छेद।

बकः अपूर्वकुलीरमांसार्थी तं कुलीरं स्कन्धमारोप्य नीतवान्।

श्रद्धेयाः अंशाः

आशयावगमनम् ।

क्रमीकरणम् ।

कथास्तम्भलेखनम्।

**कथां मातृभाषायाम् अनुवदतु।**

श्रद्धेयाः अंशाः

चर्चा ।

आशयक्रोडीकरणम्।

उचितया भाषया लेखनम्।

**बककुलीरयोः सम्भाषणं संभाव्य लिखतु ।**

श्रद्धेयाः अंशाः

आशयावगमनम् ।

क्रमीकरणम्।

संम्भाषणलेखनम्।

**कथां नाटकरूपेण परिवर्त्य अवतारयतु ।**

श्रद्धेयाः अंशाः

पात्रानुसारेण वर्गीकरणम्।

सम्भाषणपरिशीलनम्।

नाटकावतारणम्।

## अधिकविस्तरः

प्रच्छ ज्ञीप्सायां लोट् परस्मैपदी ।

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र. पु | पृच्छतु-पृच्छतात् | पृच्छताम् | पृच्छन्तु |
| म.पु | पृच्छ-पृच्छतात् | पृच्छतम् | पृच्छत |
| उ.पु | पृच्छानि | पृच्छाव | पृच्छाम |

ब्रूञ् व्यक्तायां वाचि लिट् परस्मैपदी ।

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र. पु | उवाच | ऊचतुः | ऊचुः |
| म.पु | उवचिथ-उवक्थ | ऊचथुः | ऊच |
| उ.पु | उवाच-उवच | ऊचिव | ऊचिम |

ब्रूञ् व्यक्तायां वाचि लट् आत्मनेपदी ।

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र. पु | ब्रूते | ब्रुवाते | ब्रुवते |
| म.पु | ब्रूषे | ब्रुवाथे | ब्रूध्वे |
| उ.पु | ब्रूवे | ब्रूवहे | ब्रूमहे |

छिदिर् द्वैतीभावे लिट् परस्मैपदी ।

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र. पु | चिच्छेद | चिच्छिदतुः | चिच्छिदुः |
| म.पु | चिच्छेदिथ | चिच्छिदथुः | चिच्छिद |
| उ.पु | चिच्छेद | चिच्छिदिव | चिच्छिदिम |

चाक्रिकारोहणप्रक्रिया – **संस्कृतभाषायाः कैरल्या अनूदितानां प्रसिद्धानां कथाग्रन्थानां पट्टिकां कुरुत।**

पाठः ३

# माकन्दमञ्जरी

### आमुखम्

संस्कृतसाहित्यं विविधैः काव्यविभागैः सम्पन्नं भवति। तथा भाषान्तरेभ्यः अनूदिताभिः कृतिभिः अपि संस्कृतभाषा सुसम्पन्ना। अनेन अनुवादेन भाषयोरुभयोः शैलीभेदः अवगन्तुं शक्यते सहृदयैः। कालिदासादीनां महाकवीनां कृतयः वर्षेभ्यः पूर्वमेव केरलकालिदासादिभिः कैरल्या अनूदिताः। तथैव कुमारनाशान्, उल्लूर्प्रभृतीनां महाकवीनाम् अन्येषाञ्च रचनाः गौर्वाण्या च अनूदिताः। इदानीमपि वृत्तानुवृत्तं, पदानुपदं, आशयानुसारं च संस्कृतभाषायाः इतरभाषासु तथा इतराभ्यः संस्कृतभाषायाञ्च भाषान्तरीकरणं प्रचलदस्ति।

श्रीमतः वैलोप्पिल्लि श्रीधरमेनोन् महाभागस्य **माम्पषम्** नामिका कविता कैरल्यां प्रथितास्ति। मातृवात्सल्यस्य अनुत्तमोदाहरणत्वेन प्रथितायाः केकानामभाषावृत्तनिबद्धायाः अस्याः कवितायाः स्वतन्त्राशयानुवाद एव **माकन्दमञ्जरी** । श्रीमता हरिप्रसाद् कटम्पूर् महाभागेन अनूदितायाः कवितायाः काश्चन पङ्क्तयः अत्र समाकलिताः।



अङ्गणस्थितादाम्रात् प्रथमे फले च्युते
मातुरक्षिभ्यां क्षणादपतत्तप्तोदकम्।।1।।

पूर्वं चतुर्मासेभ्यो लिप्सया प्रतीक्षिते
बालमाकन्दे सुमप्रसवे प्रवर्तिते।।2।।

वत्सलात्मजो मातुः कुतुकादेकं चूत-
स्तबकं धृत्वाह्लादादन्तिकं सम्प्राप्तवान्।।3।।

रुषया मातावदत् - “ फुल्लितं गुच्छं शिशो!
लीलया त्वया खल! भञ्जितं कष्टं कष्टम्।।4।।

पतिते चूते क्षणात् स्वीकर्तुं योग्यो भवान्
मञ्जरीं लुनात्यहो! ताडनव्यथाभावात् ”।5।।

मातुराक्षेपं श्रुत्वा पुत्रस्य मुखाम्भोजं
निष्कलं तप्ताश्रुभिर्वैवर्ण्यमाप्तं क्षणात्।6।।

“माकन्दं समाहर्तुं नागमिष्यामी”त्युक्त्वा
स्तबकं पुत्रोऽक्षिपत् सुन्दरं भूमौ शुचा।7।।

भाषणं यथायोग्यं कर्तुमज्ञाताः बालाः
दीर्घद्रष्टारो यूयं समर्थाः दैवज्ञास्ते।।8।।

ग्रीष्ममार्ताण्डांशुभिर्माकन्दे मरकतं
काञ्चनसौगन्धिकं समभूत्तस्मात्पूर्वम्।9।।

माकन्दं समाहर्तुं नोत्सुको भूत्वा मातु-
रर्भकः पुँस्कोकिलोऽप्यगच्छत्सुरलोकम् ।10।।



अमरप्रियस्सोऽपि ज्ञातिषु विमुखस्सन्
सन्ततं क्रीडालोलो विहरत्यस्मिन् काले। 11।।

अङ्गणस्थितादाम्रात् प्रथमे फले च्युते
मातुरक्षिभ्यां क्षणादपतत्तप्तोदकम्।।12।।

## पदच्छेदः

| | | |
|---|---|---|
| अङ्गणस्थितादाम्रात् | = | अङ्गणस्थितात् + आम्रात् |
| क्षणादपतत्तप्तोदकम् | = | क्षणात् + अपतत् + तप्तोदकम् |
| कुतुकादेकम् | = | कुतुकात् + एकम् |
| धृत्वाह्लादादन्तिकम् | = | धृत्वा + आह्लादात् + अन्तिकम् |
| मातावदत् | = | माता + अवदत् |
| लुनात्यहो | = | लुनाति + अहो |
| तप्ताश्रुभिर्वैवर्ण्यम् | = | तप्ताश्रुभिः + वैवर्ण्यम् |
| नोत्सुको भूत्वा | = | न + उत्सुकः + भूत्वा |
| नागमिष्यामीत्युक्त्वा | = | न + आगमिष्यामि + इति + उक्त्वा |
| पुत्रोऽक्षिपत् | = | पुत्रः + अक्षिपत् |
| दैवज्ञास्ते | = | दैवज्ञाः + ते |
| ग्रीष्ममार्ताण्डांशुभिर्माकन्दे | = | ग्रीष्ममार्ताण्डांशुभिः + माकन्दे |
| समभूत्तस्मात्पूर्वम् | = | समभूत् + तस्मात् + पूर्वम् |
| मातुरर्भकः | = | मातुः + अर्भकः |
| पुँस्कोकिलोऽप्यगच्छत् | = | पुँस्कोकिलः + अपि + अगच्छत् |
| अगच्छत्सुरलोकम् | = | अगच्छत् + सुरलोकम् |
| अमरप्रियस्सोऽपि | = | अमरप्रियः + सः + अपि |
| विमुखस्सन् | = | विमुखः + सन् |
| विहरत्यस्मिन् | = | विहरति + अस्मिन् |

## विग्रहवाक्यानि

| | | |
|---|---|---|
| अङ्गणस्थितात् | - | अङ्गणे स्थितः अङ्गणस्थितः, तस्मात्। |
| बालमाकन्दे | - | बालश्च असौ माकन्दश्च, तस्मिन्। |
| सुमप्रसवे | - | सुमस्य प्रसवः, तस्मिन्। |
| ताडनव्यथाभावात् | - | ताडनस्य व्यथा, तस्याः अभावः, तस्मात्। |
| मुखाम्भोजम् | - | मुखम् एव अम्भोजम्। |
| ग्रीष्ममार्ताण्डांशुभिः | - | ग्रीष्मे मार्ताण्डः,तस्य अंशुः, तैः। |
| काञ्चनसौगन्धिकम् | - | काञ्चनं च तत् सौगन्धिकम् च। |
| पुँस्कोकिलः | - | पुमान् च असौ कोकिलः च। |
| अमरप्रियः | - | अमराणां प्रियः। |

लोकान्तरम् - अन्यः लोकः ।

*अन्वयार्थः* (1) - **अङ्गणस्थितात्** -चत्वरस्थितात् , **आम्रात्** -आम्रवृक्षात् , **प्रथमे फले च्युते** - आद्यफले पतति सति, **मातुः** -अम्बायाः , **अक्षिभ्याम्** -नेत्राभ्याम्, **क्षणात्** -झटित्येव, **तप्तोदकम्** - तप्ताश्रु, **अपतत्** - पतति स्म।।

*आशयः* - **गृहाङ्गणस्थाद् आम्रवृक्षात् यदा प्रथमतया पक्वफलमपतत् तस्मिन्नेव काले मातुः नयनाभ्यां तप्ताश्रूणि अपतन्।।1।।**

*अन्वयार्थः* (2)- **चतुर्मासेभ्यः पूर्वम्** - चतुर्भ्यः मासेभ्यः प्राक्, **लिप्सया** -लब्धुमिच्छया, **प्रतीक्षिते** - आकाङ्क्षापूर्वं निरीक्षिते, **बालमाकन्दे** - आम्रवृक्षके,(अस्मात् आम्रमञ्जरीमवचिनोतुं शिशोरपि साध्यम् इति द्योतनाय बालः इति विशेषणम्) **सुमप्रसवे** -कुसुमोद्भवे ,**प्रवर्तिते** -प्रचलिते (सति),

(3)- **मातुः** -अम्बायाः, **वत्सलात्मजः** -प्रियपुत्रः, **कुतुकात्** -कौतुकात् , **एकं चूतस्तबकम्** -एकां चूतमञ्जरीम् , **धृत्वा** - प्रभज्य (धारयन् इति यावत्), **आह्लादात्** - सन्तोषात्, **अन्तिकम्** - (अम्बायाः) समीपम् , **सम्प्राप्तवान्** -समागतवान्।

*आशयः* - **चतुर्भ्यः मासेभ्यः पूर्वम् आम्रवृक्षे कुसुमोद्भवोऽभवत्। तदानीं मातुः प्रियपुत्रः बालोचितेन कौतुकेन तेभ्यश्चूताङ्कुरेभ्यः स्तबकमेकं प्रभज्य तस्याः समीपं सामोदमागतवान्।।(2,3)।।**

*अन्वयार्थः* (4) - **माता** -अम्बा, **रुषया** -रोषेण , **अवदत्** -वदति स्म, **खल! शिशो!** -हे दुर्विनीत बालक!, **फुल्लितं** -विकसितम्, **गुच्छम्** -पुष्पस्तबकम् , **त्वया लीलया** - त्वया क्रीडया, **भञ्जितम्** - विनाशितम् (अवमर्दितम् इति यावत्) **कष्टं कष्टम्** - एतत् खेदकरमेव।

*आशयः* - **तद्दृष्ट्वा , हे दुर्विनीत! विकसितां चूतमञ्जरीं त्वमवचिनोषि। एतद् कष्टमेव - इति माता रोषेण पुत्रं तमवदत्।4।।**

*अन्वयार्थः (5)* -**चूते** - आम्रफले , **पतिते** - गलिते (सति), **क्षणात्** -तदैव, **स्वीकर्तुं** -समाहर्तुं, **योग्यः** -समर्थः, **भवान्** , **ताडनव्यथाभावात्** -दण्डनवेदनाभावात्, (प्रहरवेदनां न ज्ञातवानिति कारणेन) , **मञ्जरीम्** -पुष्पस्तबकम् , **लुनाति**- अवचिनोति।।5।।

*आशयः* - **त्वं ताडनव्यथां न जानासि। अतः पक्वमाम्रफलं पतनावसरे एव स्वीकर्तुं योग्यः त्वमेव आम्रमञ्जरीम् अवचिनोषि (इति माता रोषेणावदत् -इति पूर्वपङ्क्तिना सहान्वयः)।।5।।**

*अन्वयार्थः (6)* - **मातुः** -अम्बायाः , **आक्षेपम्** -निन्दां, **श्रुत्वा**- निशम्य, **पुत्रस्य** -आत्मजस्य, **निष्कलं**-कलङ्करहितम्, **मुखाम्भोजम्** - मुखकमलम्, **तप्ताश्रुभिः**- दुःखबाष्पैः, **क्षणात्** -सत्वरं,

**वैवर्ण्यम्** -विवर्णभावम्, **आप्तम्-** प्राप्तम्।

*आशयः* - **अम्बायाः रोषवचनं श्रुत्वा पुत्रस्य निर्मलं मुखं तत्क्षणमेव दुःखाश्रुभिः विवर्णतां प्रपेदे।।6।।**

*अन्वयार्थः (7)* - **माकन्दम्** - आम्रफलम्, **समाहर्तुम्** -स्वीकर्तुम्, **न आगमिष्यामि** - अहं न अभ्यागमिष्यामि, **इति उक्त्वा** - इति उदित्वा, **पुत्रः** -तनयः, **सुन्दरम्** -मनोहरम्, **स्तबकम्**-कुसुममञ्जरीम्, **शुचा**-दुःखेन, **भूमौ**- भूतले, **अक्षिपत्** -क्षिपति स्म।।

*आशयः*- **अहमाम्रफलं स्वीकर्तुं नागमिष्यामि इति दुःखेन उक्त्वा पुत्रः सुन्दरं तत्स्तबकं भूमौ निचिक्षिपे।।7।।**

*अन्वयार्थः (8)* - **बालाः!** -हे बालकाः!, **यथायोग्यम्** -सम्यक् (योग्यतानुसारम् इति यावत्), **भाषणम्** - सम्भाषणम्, **कर्तुम्** -प्रयोक्तुम्, **अज्ञाताः** - असमर्थाः, **ते यूयं**- तादृशाः यूयं, **दीर्घद्रष्टारः**- दीर्घदर्शिनः , **समर्थाः**- परिचयसम्पन्नाः , **दैवज्ञाः** -ज्यौतिषिकाः **(स्थ)**।

*आशयः* - **हे बालाः! सम्यक् रीत्या सम्भाषणं कर्तुमसमर्थाः भवन्तः, भाविं प्रवक्तुम् अतिसमर्थाः भवन्ति। (लीलया कृतं शिशूनां वचनमपि कदाचित् सम्यक् फलति इति कविहृदयः)**

*अन्वयार्थः (9,)*- **ग्रीष्ममार्ताण्डांशुभिः** - निदाघकालसूर्यकिरणैः ,**माकन्दे**-आम्रवृक्षे, **मरकतं** - मरतकवर्णम् आम्रफलम्, (यथा) **काञ्चनसौगन्धिकं** - स्वर्णवर्णं तथा सुगन्धसमेतं च, **समभूत्** - (परिणामम्)अवाप्नुयात्, **तस्मात् पूर्वम्** - तस्मात् कालात् पूर्वम्।

(10) **मातुः** -अम्बायाः, **अर्भकः** - शिशुः ,**पुँस्कोकिलः**- पुमान् कोकिलः, **माकन्दम्** - आम्रफलम्, **समाहर्तुम्**- स्वीकर्तुम्, **न उत्सुकः भूत्वा**- अनिच्छन् , **सुरलोकम्**- स्वर्लोकम् (दिवम् इति यावत्) **अगच्छत्**- अगात्।

*आशयः* - **अथ ग्रीष्मकालसूर्यकिरणैः प्रदीप्तं (परिपक्वम्) आम्रफलं मरतकवर्णं परित्यज्य स्वर्णवर्णं सुगन्धपूर्णञ्चाभवत्। किन्तु तस्मात् कालात् पूर्वं मातुः प्राणप्रियः पुत्रः, पुँस्कोकिलः इव आम्रफलं समाहर्तुम् अनिच्छन् दिवमगच्छत्।। (पुँस्कोकिलः चूतस्य सुमप्रसवसमय एव तस्मिन् तत्परो भवति, न तु चूतफलास्वादने । तदिव अयमर्भकोऽपि तस्मिन् विमुखोऽभूदित्याशयः) 9,10।।**

*अन्वयार्थः* (11)**अमरप्रियः अपि** -देवानां वात्सल्यपात्रम् अपि (अपि इति सम्भावनार्थे)**सः** -अयं बालकः, **ज्ञातिषु** - बन्धुजनेषु, **विमुखः** -पराङ्मुखः (उदासीन इति यावत्)**सन्ततं** -निरन्तरं ,

**क्रीडालोलः सन्**- केलीतत्परः सन् , **विहरति** -(यदा) क्रीडति, **अस्मिन् काले**- एतत्काले,

(12) - **अङ्गणस्थितात्** -चत्वरस्थितात् , **आम्रात्** -आम्रवृक्षात् , **प्रथमे फले च्युते** - आद्यफले पतति सति, **मातुः** -अम्बायाः , **अक्षिभ्याम्** -नेत्राभ्याम्, **क्षणात्** -झटित्येव, **तप्तोदकम्** - तप्ताश्रु, **अपतत्** - पतति स्म।।

*आशयः* **-दिवं गतः अयं बालकः देवानां प्रियङ्करो भूत्वा बान्धवेषु उदासीनस्सन् क्रीडातात्पर्येण अत्र व्यहरत् । तस्मिन्नेव काले गृहाङ्गणस्थाद् आम्रवृक्षात् प्रथमपतितं पक्वमाम्रफलं वीक्षितवत्याः मातुः नयनाभ्यां तप्ताश्रूणि अपतन्।।11,12।।**

## पठनप्रवर्तनम्

**कवितां सतालम् आलपतु।**

श्रद्धेयाः अंशाः

उचितं तालम् ।

भावात्मकता ।

उच्चारणशुद्धिः।

**पाठभागाद् इष्टतमाः पङ्क्तीः चित्वा आस्वादनटिप्पणीं लिखतु।**

श्रद्धेयाः अंशाः

इष्टस्य कारणम्।

उचितभाषाप्रयोगः।

आशयपूर्णता।

**अङ्गणस्थितादाम्रात् प्रथमे फले च्युते मातुरक्षिभ्यां तप्तोदकम् अपतत्। वाक्यमिदं यदा...तदा उपयुज्य परिवर्तयतु। समानप्रयोगान् चित्वा लिखतु।**

श्रद्धेयाः अंशाः

प्रयोगसादृश्यम्

उचितलकारप्रयोगः

आशयपूर्णता

**कैरलीतः संस्कृतभाषया अनूदितानां कृतीनां तेषां कर्तॄणां च पट्टिकां करोतु।**

श्रद्धेयाः अंशाः औचित्यम्। कालक्रमः ।

**कवितायाः आशयं कथारूपेण परिवर्त्य लिखतु।**

श्रद्धेयाः अंशाः

उचितभाषाप्रयोगः।

आशयपूर्णता।

कथाघटना।

## कोशः

| | |
|---|---|
| **अङ्गणम्** | -अङ्गणं चत्वराजिरे। |
| **आम्रः** | -आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः। |
| **मञ्जरी** | -वल्लरिर्मञ्जरिस्त्रियाम्। स्याद् गुच्छकस्तु स्तबकः। |
| **आक्षेपः** | -अवर्णाक्षेपनिर्वादपरिवादापवादवत्। |
| **दैवज्ञः** | -ज्यौतिषिको दैवज्ञो गणकावपि। |

### विशेषः

- **रुषया** - रुषा इत्याकारन्तशब्दस्य तृतीयैकवचनं रूपम्।
  ***क्रोधो भामः क्रुधा रुषा*** -इति शब्दार्णवः। भागुरिमतेन रुट्
  शब्दस्य टाप् योगेन आकारान्तत्वम्। तदुक्तम्-
  **वष्टि भागुरिरल्लोपः अवाप्योरुपसर्गयोः।**
  **आपञ्चैव हलन्तानां यथा वाचा निशा दिशा।।** -इति। एवम्-
  निट् -**निशा** , रुट् -**रुषा**, दिक् -**दिशा**, वाक् -**वाचा** इति आकारान्तरूपमपि साधुः।।

- आम्रम्- आम्रस्य फलम् । **द्विहीनं प्रसवे सर्वम्** इति नियमेन क्लीबत्वम् ।
  **फले लुक् (4-3-163)** इति लुक्। एवं माकन्दम्, चूतम् इत्यत्रापि द्रष्टव्यम्।

## अभ्यासपत्रिका -१

१) निर्दिष्टाशययुक्तं श्लोकं पाठभागात् निर्धार्य लिखतु ।

अ ) सज्जनाः कृतमुपकारं कदापि न विस्मरन्ति ।

आ) सूर्योदये स्वपन्तं जनं लक्ष्मी त्यजति।

इ) मनः यस्मिन् लीयते तत्सर्वं मधुरं भवति।

ई) रागद्वेषादिविमुक्तस्य जनस्य भवनं सदा तपोवनतुल्यं भवति।

२) सम्भाषणांशं पूरयतु।

बकः - आगच्छतु। भवन्तमपि देशान्तरं नेष्यामि।

कुलीरः - आगच्छामि।........................................?

बकः - मम कण्ठमारोहतु। अहं मत्स्यानामपरेषां समीपं नीत्वा त्वामपि रक्षिष्यामि।

कुलीरः - ............................................................।

बकः - ते अत्र भीतिं विना वसन्ति। ....................................?

कुलीरः - त्वां विश्वसिमि।..............................................।

३) विवर्तकानां ग्रन्थानां नामानि यथोचितं योजयतु।

अभिज्ञानशाकुन्तलम् - कुञ्जिक्कुट्टन् तम्पुरान्।

वाल्मीकिरामायणम् - वेण्णिक्कुलं गोपालक्कुरुप्प्।

महाभारतम् - एन्.गोपालप्पिल्ला।

रामचरितमानसम् - वल्लत्तोल् नारायणमेनोन्।

चिन्ताविष्टा सीता - केरलवर्मा वलियकोयित्तम्पुरान्।

४) उदाहरणानुसारं लिखतु।

उदा) अन्यः देशः - देशान्तरम्।

.................... - लोकान्तरम्।

अन्या भाषा - ..................।

५) पदच्छेदं लिखतु।

नास्त्यौषधम् - ..............................।

साधवो विस्मरन्ति - ..............................।

श्रीरपि - ...............................।

६) उदाहरणानुसारं वाक्यानि योजयतु।

उदा- रामः वनं गतः। दशरथः दिवं गतः।

रामे वनं गते दशरथः दिवं गतः।

अ) घण्टानादः श्रुतः। छात्राः बहिः धावन्ति।

आ) आम्रफलं पतितम्। मातुः नयनाभ्यां अश्रूणि अपतन्।

इ) अध्यापकः आगतः। छात्राः उदतिष्ठन्।

७) श्लोकस्य गद्यक्रमं लिखतु ।

तृणानि नोन्मूलयति प्रभञ्जनो
मृदूनि नीचैः प्रणतानि सर्वतः ।
समुच्छ्रितानेव तरून् प्रबाधते
महान् महत्येव करोति विक्रमम् ।।

## शब्दकोशः

| | | | | |
|---|---|---|---|---|
| अकुत्सितम् | अनिन्दिम् | നിന്ദിതമല്ലാത്ത | Virtous | ದುಷ್ಟಬಾನಹೊಂದಿದ |
| अमृतकल्पम् | अमृततुल्यम् | അമൃതതുല്യം | equal to Nectar | ಅಮೃತಸಮಾನತ |
| अङ्कणम् | चत्वरम् | മുറ്റം | Court yard | ಅಂಗಳ |
| अनूदितम् | भाषान्तरीकृतम् | വിവർത്തനം | Translated | ರೂಪಾಂತರಗೊಳಿಸುದು |
| आजीवनान्तम् | आमरणात् | ജീവിതാവസാനം വരെ | Till death | |
| आम्रम् | आम्रफलम् | മാങ്ങ | Mango | ಮಾವಿನಹಣ್ಣು |
| इन्द्रियनिग्रहः | इन्द्रियानुरोधः | ഇന്ദ്രിയങ്ങളുടെ നിയന്ത്രണം | Harmful | |
| कुचेली | कुत्सितचेलधारी | ജീർണ്ണവസ്ത്രധാരി | One who wears worm cloths | ಮಲಿನವಸ್ತ್ರದಾರಿ |
| कुलीरः | कर्कटः | ഞണ്ട് | Crab | |
| कैवर्तः | मत्स्यग्राहकः | ധീവരൻ | Fisherman | |
| गर्दभः | रासभः | കഴുത | Donkey | ಕತ್ತೆ |
| गुच्छं | स्तबकः | പൂങ്കുല | Bunch of flower | ಸಿಂಗಾರ |
| गौः | धेनुः | പശു | Cow | ದನ |
| चक्रपाणिः | विष्णुः(चक्रधरः) | വിഷ്ണു | God vishnu | ವಿಷ್ಣು |
| चूतस्तबकम् | चूतगुच्छम् | മാങ്കുല | Bunch of mango flower | |
| छत्रम् | आतपत्रम् | കുട | Umbrella | ಕೊಡೆ |
| तप्तोदकम् | तप्तनयनाश्रुः | ചുടുകണ്ണീർ | Hot eye drop | ದುಃಖದಕಣ್ಣೀರು |
| तोयम् | जलम् | ജലം | Water | ನೀರು |
| तृणम् | शष्पम् | പുല്ല് | Grass | ಹುಲ್ಲು |
| दधि | नवनीतम् | വെണ്ണ | Curd | ಬೆಣ್ಣೆ |
| द्राक्षा | द्राक्षाफलम् | മുന്തിരി | Grapes | ದ್ರಾಕ್ಷೆ |
| नागेन्द्रः | गजश्रेष्ठः | ഗജശ്രേഷ്ഠൻ | Best Elephant | ಆನೆ |
| निशिताङ्कुशः | तीक्ष्णः अङ्कुशः | മൂർച്ചയേറിയ തോട്ടി | Instrument to control the elephant | ಹರಿತವಾತ ಅಂಕುಶ |
| निहितभाराः | धृतभाराः | ഭാരമേറ്റിയവ | Bearing the burden | ಭಾರಹೊರುವವನು |



| | | | | |
|---|---|---|---|---|
| पद्मं | कमलम् | താമര | Lotus | ತಾವರೆ |
| पश्चिमविभागः | प्राची दिक् | പടിഞ്ഞാറ് | West | ಪಶ್ಚಿಮ |
| प्रणतं | विनतम् | നന്നായിതലകുനിച്ച | vowed | ವಿನಯದಿಂದ ತಲೆಬಾಗು |
| प्रभञ्जनः | महावातः | കൊടുങ്കാറ്റ് | Storm | ಬಿರುಗಾಳಿ |
| फुल्लितम् | विकसितम् | വികസിച്ചത് | Blossamed | ವಿಕಾಸಹೊಂದಿದ |
| बह्वाशी | अमितभोजी | അമിതമായി ആഹാരം കഴിക്കുന്നവൻ | One who eats a lot | ಅತಿಯಾದ ಆಹಾರ ಸೇವಿಸುವವನು |
| भञ्जितम् | शिथिलितं | ഒടിക്കപ്പെട്ടത് | Broken | ತುಂಡಾದ |
| भानुः | सूर्यः | സൂര്യൻ | Sun | ಸೂರ್ಯ |
| भाषितम् | उक्तम् | പറയപ്പെട്ടത് | spoken | ಹೇಳಲ್ಪಟ್ಟದು |
| भेषजम् | औषधम् | മരുന്ന് | Medicine | ಮದ್ದು / ಔಷಧಿ |
| मधु | पुष्परसः | തേൻ | Honey | ಜೇನು |
| मुखाम्भोजम् | मुखकमलम् | താമരപോലുള്ള മുഖം | Face like lotus | ತಾವರೆಯಂತಿರುವ ಮುಖ |
| रागी | विषयानुरागयुक्तः | ലൗകികകാര്യങ്ങളിൽ ആസക്തി ഉള്ളവൻ | Lust | ಲೌಕಿಕವಿಷಯದಲ್ಲಿ ಆಸಕ್ತಿಯಿರುವವನು |
| रुषा | कोपः | കോപം | Anger | ಕೋಪ |
| वह्निः | अग्निः | തീ | Fire | ಅಗ್ನಿ |
| विक्रमः | पराक्रमः | പരാക്രമം | Valour | ಪರಾಕ್ರಮ |
| समाहर्तुम् | सम्पादयितुम् | സ്വീകരിക്കുവാൻ | To collect | ಸ್ವೀಕರಿಸಲು |
| समुच्छ्रिताः | उन्नतशीर्षः | ഉയർന്നുനിൽക്കുന്ന | High headed | ಬೆಳದು ನಿಂತಿರುವ |
| सरः | नदः (सरित्) | അരുവി | Stream | ಸಣ್ಣ ಹೊಳೆ |
| सलिलम् | जलम् | ജലം | Water | ನೀರು |
| सुधा | अमृतम् | അമൃത് | Nectur | ಅಮೃತ |
| सुमप्रसवे | कुसुमप्रसूतिः | പൂവിടരൽ | Blossom | ಹೂಗಳು ಅರಳುವುದು |
| सूर्यातपः | सूर्यतापः | വെയിൽ | The heat of sun | ಸೂರ್ಯ ತಾಪ |
| संलग्नम् | सम्मिलितम् | പറ്റിച്ചേർന്നത് | Closely attached | ಕರಗತವಾದ |
| हुतभुक् | अग्निः | അഗ്നി | Fire | ಅಗ್ನಿ |

# किमधिगतम्

**निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√ ) क्रियताम्**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १ | | | | | |
| २ | | | | | |
| ३ | | | | | |
| ४ | | | | | |
| ५ | | | | | |
| ६ | | | | | |

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।

### आमुखम्

कुसुमानामास्वाद्यता तेषां दलेषु एव भवति। विगलितदलानि कुसुमानि के स्वीकुर्वन्ति? तद्वत् संस्कृतकाव्यानां मूलभूतमादिकाव्यं रामायणं तथा कथासाहित्यं च विहाय संस्कृतसाहित्यं कथं पूर्णं भवति?

दलनामके अस्मिन् एकके पाठद्वयं समायोजितम्। रामायणकाव्यात् समाकलितः **श्रियो मूलमनिर्वेदः** इति पाठः, वेतालपञ्चविंशतीतः समाकलितः **क्रियावान् पुरुषो विद्वान्** इति कथापाठश्च अस्मिन् एकके अन्तर्भवतः।



## एककम् २

# दलम्

**पठनाधिगमाः**

- श्लोकान् सतालमालपति।
- श्लोकानामाशयं संगृह्य वदति, लिखति।
- इष्टतमस्य श्लोकस्य आस्वादनटिप्पणीं लिखति।
- कथास्तम्भं क्रमीकरोति।
- कथायाः सारांशं कैरल्यां लिखित्वा अवतारयति।
- कथां सम्भाषणरूपेण परिवर्त्य लिखति।
- प्रधानाशयान् सङ्गृह्य टीकां रचयति।

**प्रवेशकः** - **विदुषां प्रचोदनं जीवितविजयाय कथं प्रयोजकं भवति इति विषये चर्चां कुरुत।**

पाठः ४

# क्रियावान् पुरुषो विद्वान् ।



## आमुखम्

सोमदेवभट्टेन विरचितः कथासमाहारग्रन्थः भवति कथासरित्सागरः। तस्मात् समाकलितः भवति वेतालपञ्चविंशतिः । तस्मिन् ग्रन्थे वेतालोक्तचतुर्विंशतिकथाः मूलकथां च योजयित्वा पञ्चविंशतिः कथाः सन्ति। ताः तु नृपः त्रिविक्रमसेनः एकेन वेतालेन श्राविताः भवन्ति।

**उज्जयिनी** भुवनविश्रुता काचन नगरी आसीत्। तत्रत्यस्य राज्ञः पुण्यसेनस्य मन्त्री आसीत् हरिस्वामीति कश्चन विप्रः। तस्य देवस्वामी नाम पुत्रः सोमप्रभा नाम पुत्री च आस्ताम्।

शैशवातिक्रान्ता सोमप्रभा एकदा मातुर्मुखेन पितरं भ्रातरञ्च जगाद। "शूराय ज्ञानिने विज्ञानिने वा अहं देया, अन्यथाहं न जीवामि" इति। तदाकर्ण्य तस्याः पिता हरिस्वामी वरविषये चिन्ताकुलो आसीत्।

एकदा हरिस्वामी दूतकार्यार्थं दाक्षिणात्यस्य नृपस्य सकाशं राज्ञा प्रेषितः। तत्र च कन्यावृत्तान्तं ज्ञात्वा कश्चित् ब्राह्मणयुवा कृतकार्यं तं ताम् अयाचत।

सः युवा विज्ञानी इत्यवगत्य "सप्तमे दिने विवाहार्थम् आगच्छ" इति हरिस्वामी अवदत्। तस्मिन्नेव दिने उज्जयिन्यां सोदरः माता च एकैकं ब्राह्मणकुमारं मिलित्वा शूरं ज्ञानिनं च संबुद्ध्य सप्तमेऽहनि विवाहं निश्चिकाय।

हरिस्वामी प्रत्यागत्य यथाकृतं सर्वं पुत्रं भार्यां च अकथयत्। तौ च स्वं स्वं कृतं च सर्वं पृथक् पृथक् तस्मै न्यवेदयताम्। एतच्छ्रुत्वा हरिस्वामी त्रयाणां यूनां निमन्त्रणे नितरां व्याकुलः समपद्यत।

अथ सप्तमे दिने आगते त्रयोऽपि कन्यार्थिनः हरिस्वामिनः गृहम् आययुः। तदानीं सोमप्रभामदृष्ट्वा सर्वे व्याकुलचित्ताः जाताः। तज्ज्ञात्वा ज्ञानी अवदत् "धूम्रशिखाख्यः राक्षसः तामपहृत्य विन्ध्याटव्यां निजां वसतिं अगच्छत्" इति। तच्छ्रुत्वा हरिस्वामी भीतः विज्ञानिनम् उपायं पप्रच्छ। स

तु सर्वास्त्रसंयुतं रथं कृत्वा हरिस्वामिनं ज्ञानिशूरौ च तत्क्षणं विन्ध्याटवीं प्रापयामास । तत्र ज्ञानिना समाख्यातां राक्षसस्य वसतिं प्राप्य शूरः राक्षसं योधयामास। तदा तयोः मनुष्यराक्षसयोः रामरावणयोरिव महायुद्धमवर्तत। अन्ते शूरः राक्षसस्य शिरः बाणेन अच्छिनत्। पुनः सोमप्रभामादाय ते सर्वे रथेन उज्जयिनीं प्रत्यागमन् ।

अथ हरिस्वामिनः गृहं प्रत्यागतानां तेषां त्रयाणां मध्ये महान् विवादः जातः। ज्ञानी अवदत् यदि अहं ज्ञानबलेन एतत् सर्वं न जानीयां तर्हि कथमियं गूढस्था प्राप्येत। अतः मह्यमेव एषा देया इति। विज्ञानी अवोचत्। यद्यहं व्योमरथं न कुर्यां तर्हि देवानामिव तत्र गतागतं कथं तत्क्षणं स्यात् ? तस्मात् मह्यमेव इयं दातव्या इति। यद्यहं तं राक्षसं रणे न हन्यां, तदा युवाभ्यां यत्ने कृतेऽपि क एनामानयेत् ? तन्मह्यमेव कन्येयं दातव्या इति शूरश्चाब्रवीत्। तेषु विवदमानेषु सत्सु हरिस्वामी भ्रान्तचित्तः भूत्वा तूष्णीमतिष्ठत्।

कथामिमामाख्याय वेतालः राजानं पप्रच्छ "राजन्! एतेषु कस्मै सा देयेति भवान् वदतु" इति। तच्छ्रुत्वा राजा अब्रवीत् सा शूराय तस्मै प्रदातव्या, येन देहपणोद्यमात् बाहुबलेन तं राक्षसं जित्वा कन्या समुपार्जिता। ज्ञानिविज्ञानिनौ तु विधिना अस्य सहायौ नियोजितौ इति।नृपवचनमिदं श्रुत्वा वेतालः तुतोष।

### पदच्छेदः

| | | |
|---|---|---|
| मातुर्मुखेन | - | मातुः + मुखेन । |
| भ्रातरञ्च | - | भ्रातरं + च । |
| भविष्यञ्च | - | भविष्यम् + च । |
| तज्ज्ञात्वा | - | तत् + ज्ञात्वा |
| तच्छ्रुत्वा | - | तत् + श्रुत्वा |
| रामरावणयोरिव | - | रामरावणयोः + इव |
| यद्यहम् | - | यदि + अहम् |
| कन्येयम् | - | कन्या + इयम् |

कृतेऽपि - कृते + अपि

**विग्रहवाक्यानि।**

| | | |
|---|---|---|
| भुवनविश्रुता | - | भुवनेषु विश्रुता । |
| चिन्ताकुलः | - | चिन्तया आकुलः । |
| कृतकार्यम् | - | कृतः कार्यः येन सः, तम्। |
| सर्वास्त्रसंयुतम् | - | सर्वैः अस्त्रैः संयुतः, तम् । |
| गूढस्था | - | या गूढं तिष्ठति सा । |
| गतागतम् | - | गतम् च आगतं च । |
| भ्रान्तमानसः | - | भ्रान्तं मानसं यस्य सः । |
| देहपणोद्यमात् | - | देह एव पणः देहपणः तदर्थम् उद्यमः तस्मात् । |

कथासरित्सागरः।

सोमदेवभट्टः कथासरित्सागरस्य कर्ता। ग्रन्थेऽस्मिन् विविधानां कथानां समाहारः विद्यते। सागर इव व्याप्तेऽस्मिन् ग्रन्थे लम्बकस्थायाः महाकथायाः कथापात्रैः सम्भाषणाभ्यन्तरे प्रसङ्गवशात् तरङ्गाः इव लघुकथाः सन्निवेशिताः। एवं सागरपदम् अन्वर्थं करोति।

**पठनप्रवर्तनानि।**

**कथाभागं भावानुसारम् अवतारयतु।**

श्रद्धेयांशाः

भावात्मकतया अवतारणम्।

घटनामनुसृत्य शब्दक्रमीकरणम्।

आशयावगतिः।

**आशयं क्रमीकृत्य कथास्तम्भं क्रमीकरोतु।**

- तेषां त्रयाणां मध्ये महान् विवादः जातः।
- हरिस्वामी दूतकार्यार्थं दाक्षिणात्यस्य नृपस्य सकाशं राज्ञा प्रेषितः।
- तस्य देवस्वामी नाम पुत्रः, सोमप्रभा नाम पुत्री च आस्ताम्।
- हरिस्वामी भीतः विज्ञानिनम् उपायं पप्रच्छ।
- हरिस्वामी त्रयाणां वराणां निमन्त्रणात् नितरां व्याकुलः समपद्यत।

**कथायाः सारांशं लिखतु।**

श्रद्धेयांशाः

सरला भाषा।

कथायाः क्रमानुगतिः।

आशयस्य पूर्णता।

कथां कैरल्याम् अनुवदतु।

श्रद्धेयांशाः

उचितपदप्रयोगः।

आशयव्यक्तता।

क्रमीकरणम्।

**कथापात्राणां सम्भाषणं सम्भाव्य लिखतु।**

(१,सोदरशूरयोः, २.मातृज्ञानिनोः)

श्रद्धेयांशाः

सम्भाषणशैली।

आशयव्यक्तता।

उचितभाषाप्रयोगः।

**वेतालपञ्चविंशतीतः अन्यासां कथानां समाकलनं करोतु ।**

**क्रियाशक्तिरनिवार्या -** आशयमिममधिकृत्य चर्चां करोतु।

श्रद्धेयांशाः

भागभागित्वम्।

स्पष्टावतारणम्।

संक्षिप्ततया अवतारणम्।

**अव्ययानां पट्टिकां करोतु।**

**धातुपरिचयः।**

| | | |
|---|---|---|
| जगाद | - | गाद व्यक्तायां वाचि परस्मैपदी लिट् प्रथम पुरुष एकवचनम् । |
| समपद्यत | - | सम् पद्लृ गतौ आत्मनेपदी लङ् प्रथमपुरुष एकवचनम् । |
| आययुः | - | आङ् या प्रापणे परस्मैपदी लिट् प्रथमपुरुष बहुवचनम् । |

| | | |
|---|---|---|
| पप्रच्छ | - | प्रच्छ् ज्ञीप्सायां परस्मैपदी लिट् प्रथमपुरुष एकवचनम् । |
| कुर्याम् | - | डुकृञ् करणे परस्मैपदी विधिलिङ् उत्तमपुरुषैकवचनम् । |
| आनयेत् | - | आङ् णीञ् प्रापणे णिचि परस्मैपदी विधिलिङ् प्रथमपुरुषैकवचनम् । |

**वेतालपञ्चविंशतिः ।**

सोमदेवभट्टेन विरचित कथासरित्सागरः। तस्मात् समाकलितानां पञ्चविंशतिकथानां समाहारः वेतालपञ्चविंशतिः इति नाम्ना प्रथितः। ताः कथाः प्रतिष्ठानाख्यस्य जनपदस्य नृपाय त्रिविक्रमसेनाय वेतालेन श्राविताः सन्ति।

त्रिविक्रमसेनस्य शासनसमये क्षान्तिशीलो नाम भिक्षुः प्रतिदिनं एकैकं फलं राज्ञे अदात्। नृपः तदादाय कोशाधिकारिणः हस्ते प्रतिदिनं न्यक्षिपत्। इत्थं द्वादशवर्षेषु गतेषु एकदा सभागतोऽसौ भिक्षुः राज्ञे यथायथं फलं दत्वा सभागृहात् निर्जगाम। राजा तु तस्मिन्नहनि एकस्मै क्रीडामर्कटपोताय तत्फलम् अदात्। सः मर्कटः यदा तत् फलं भोक्तुमारभत तदा तस्मात् अनर्घं रत्नं निरगात्। तद्दृष्ट्वा राजा तद्रत्नमादाय कोशाधिकारिणं पप्रच्छ। भिक्षुणा उपनीतानि फलानि त्वया कुत्र स्थापितानि इति। कोशाधिकारी शीघ्रं गत्वा किञ्चित्समयानन्तरमागत्य "फलानां स्थाने रश्मिज्वालाकुलं रत्नराशिं पश्यामि" इत्युक्तवान्। तदाकर्ण्य राजा तं भिक्षुमुपेत्य एवमपृच्छत् "भिक्षो! कथमेवं धनव्ययेन नित्यं मां सेवसे? यावत् कारणं न वक्ष्यसि तावत् ते फलं न ग्रहिष्ये"। इत्युक्तवन्तं नृपं भिक्षुः अवदत् "मम भवतां साहाय्यमावश्यकम्। भवान् आगामिन्यां कृष्णचतुर्दश्यां निशि महाश्मशानतः दक्षिणाभिमुखं गत्वा एकस्मिन् शिंशपातरौ वर्तमानं शवम् इहानीयताम्" इति। तदर्थं राजा महान्तं यत्नमकरोत्। वेतालाधिष्ठितं शवं स्कन्धे आदाय मौनेन गन्तुम् उपचक्रमे। तदानीं शवाधिष्ठितः वेतालः नृपम् अब्रवीत् "राजन्! अध्वविनोदाय कथामाख्यामि। शृणु ..." एवं वेतालः कथामुक्त्वा एकैकस्याः कथायाः अन्ते एकैकं प्रश्नं पृच्छति। यदा राजा एकैकस्य प्रश्नस्य उत्तरम् अवदत् तदा वेतालः वृक्षोपरि प्रलम्बमानो भूत्वा अशेत। एवं पञ्चविंशत्यां कथायां नृपस्य उत्तरदानाभावे वेतालः शवं त्यक्त्वा अन्यत्र अगच्छत्।

“ ”

चाक्रिकारोहणप्रक्रिया – **उपदेशात्मिकां काञ्चित् इतिहासकथां लिखित्वा अवतारयतु।**



पाठः ५

# श्रियो मूलमनिर्वेदः

## आमुखम्

आदिकविः वाल्मीकिः, आदिकाव्यं रामायणम् इति च सुविदितम् । रामायणमेव आदिकाव्यमिति विद्वत्सम्मतम् । काव्यमिदं सकलवागर्थमकुटमणिरिव भासते नित्यम् ।

रावणापहृतां सीतामन्विष्य लङ्कामुपगतः हनूमान् अन्तःपुरे जनपदे च ताम् अदृष्ट्वा प्रथमं निराशोऽभवत् । ततः हनूमान् सीतावार्तां विना प्रत्यागमने निन्दापात्रतां विचिन्तयति । तथा अनिर्वेदकृतं कर्म एव फलमाप्नुयात् इति मत्वा वर्धितात्मवीर्यः सः सीतान्वेषणं पुनरारब्धुं निश्चिकाय। सुन्दरकाण्डात् सः एव सन्दर्भः पाठभागे स्वीकृतः।

१ स तस्य मध्ये भवनस्य मारुति-
लर्तागृहांश्चित्रगृहान्निशागृहान् ।
जगाम सीतां प्रति दर्शनोत्सुको
न चैव तां पश्यति चारुदर्शनाम् ।।



**पदच्छेदः**

| | | |
|---|---|---|
| स तस्य | - | सः + तस्य |
| मारुतिर्लतागृहांश्चित्रगृहान्निशागृहान् | - | मारुतिः +लतागृहान् + चित्रगृहान् + निशागृहान् |
| चैव | - | च + एव |

**विग्रहः**

| | | |
|---|---|---|
| मारुतिः | - | मरुतः अपत्यं पुमान् । |
| चारुदर्शनाम् | - | चारु दर्शनं यस्याः ताम् । |
| दर्शनोत्सुकः | - | दर्शने उत्सुकः । |

| अन्वयः | अन्वयार्थः |
|---|---|
| मारुतिः | हनुमान् |
| तस्य | रावणस्य |
| भवनस्य मध्ये | प्रासादस्य मध्ये |
| लतागृहान् | लतानिकुञ्जान् |
| चित्रगृहान् | विविधवर्णलिप्तान् निकेतान् (गृहान् इति आर्षः प्रयोगः) |
| निशागृहान् प्रति | रात्रिवसतीः लक्ष्यीकृत्य |
| जगाम । | अगच्छत् । |
| सीतां | मैथिलीं |
| प्रतिदर्शनोत्सुकः | प्रत्यवलोकनतत्परः |
| सः | हनुमान् |

| | |
|---|---|
| चारुदर्शनां | मनोहररूपां(सुन्दरीं) |
| ताम् एव च | सीताम् एव हि |
| न पश्यति । | न अवलोकयति । |

**भावार्थः**

वायुपुत्रः हनुमान् रावणभवनानां मध्ये लतानिकुञ्जान् विचित्ररूपाणि गृहाणि तथा निशागृहाणि च जगाम। सीतादर्शनव्यग्रः सः मनोहररूपां तामेव न अपश्यत् ।

**कोशः**

गृहम् - ‘ गृहं गेहोदवसतिवेश्मसद्मनिकेतनम् ’ इत्यमरः।

**धातुरूपाणि**

‘जगाम’- गम्लृ गतौ धातु लिट् परस्मैपदि ।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र-पु | जगाम | जग्मतुः | जग्मुः |
| म-पु | जगमिथ- जगन्थ | जग्मथुः | जग्म |
| उ-पु | जगाम - जगम | जग्मिव | जग्मिम |

२ **स चिन्तयामास ततो महाकपिः**
**प्रियामपश्यन् रघुनन्दनस्य ताम्।**
**ध्रुवं हि सीता म्रियते यथा न मे**
**विचिन्वतो दर्शनमेति मैथिली।।**

**पदच्छेदः**

| | | | |
|---|---|---|---|
| स चिन्तयामास | - | सः | + चिन्तयामास । |
| ततो महाकपिः | - | ततः | + महाकपिः । |

विचिन्वतो दर्शनमेति - विचिन्वतः + दर्शनम् एति ।

## विग्रहः

महाकपिः - महान् चासौ कपिश्च।
रघुनन्दनस्य - रघूणां नन्दनः तस्य ।
मैथिली - मिथिलायाः राजा मिथिलः, मिथिलस्य अपत्यं स्त्री।

| अन्वयः | अन्वयार्थः |
|---|---|
| रघुनन्दनस्य | श्रीरामचन्द्रस्य |
| प्रियां तां | कान्तां तां (सीतां) |
| अपश्यन् | न पश्यन् (अदृष्ट्वा) |
| सः महाकपिः | स वानरवीरः |
| ततः | तदनन्तरम् |
| चिन्तयामास | (एवम्) अचिन्तयत् । |
| विचिन्वतः | अन्वेषणं कुर्वतः |
| मे दर्शनं | मम दृष्टिपथं |
| मैथिली | सीता |
| न एति । | न प्राप्नोति । |
| यथा | येन केनापि प्रकारेण |
| सीता | सीतादेवी (सा) |
| म्रियते | मरणं प्राप्यते |
| ध्रुवं हि (इति) | इति सन्दिह्यते(मया) |

## भावार्थः

स वानरसत्तमः सीतां मार्गमाणः तामदृष्ट्वा रामभामिनी सा कदाचित् मृता भवेदिति (मृतिम् उपगम्यत इति) अचिन्तयत्।

## कोशः

वानरः - ‘ कपिप्लवङ्गप्लवगशाखामृगवलीमुखाः ’ ।

**धातुरूपाणि**

| | | |
|---|---|---|
| म्रियते | - | मृ हिंसायाम् कर्मणि लटि प्र. पु. ए. व.। कर्तरि लट् मृणाति। |
| अपश्यन् | - | नञ् पूर्वक दृशिर् धातोः शत्रन्तं प्र. ए. व । |
| विचिन्वतः | - | वि पूर्वक चिनु धातोः शत्रन्तं षष्ठी ए. व । |

३ **सा राक्षसानां प्रवरेण जानकी**
**स्वशीलसंरक्षणतत्परा सती।**
**अनेन नूनं प्रतिदुष्टकर्मणा**
**हता भवेदार्यपथे परे स्थिता।।**

**पदच्छेदः**

भवेदार्यपथे - भवेत् + आर्यपथे ।

**विग्रहः**

| | | |
|---|---|---|
| स्वशीलसंरक्षणतत्परा | - | स्वस्य शीलं स्वशीलम्, तस्य संरक्षणं स्वशीलसंरक्षणम्, तस्मिन् तत्परा। |
| जानकी | - | जनकस्य अपत्यं स्त्री । |
| प्रतिदुष्टकर्मणा | - | कर्मणि कर्मणि प्रति दुष्टः यः सः प्रतिदुष्टकर्मा, तेन। |
| आर्यपथे | - | आर्याणां पन्था आर्यपथः, तस्मिन् । |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| परे | महति |
| आर्यपथे | श्रेष्ठमार्गे |

| | |
|---|---|
| स्थिता | वर्तमाना |
| स्वशीलसंरक्षणतत्परा | स्वपतिव्रतात्वसंरक्षणोत्सुका |
| सती | पतिव्रता |
| सा जानकी | सीता |
| प्रतिदुष्टकर्मणा | हीनकर्मणा |
| अनेन | एतेन |
| राक्षसानां प्रवरेण | राक्षसराजेन(रावणेन) |
| नूनं | निश्चयं |
| हता | मारिता |
| भवेत् (इति चिन्तयामास) । | स्यात् (इति अचिन्तयत्) । |

**भावार्थः**

सन्मार्गे तिष्ठन्ती स्वपातिव्रत्यरक्षणोत्सुका सती सा सीता निष्ठुरप्रतिकारेच्छुना रावणेन नूनं विपन्ना भवेत् इति हनुमान् शङ्कयामास।

**कोशः**

राक्षसः - ‘राक्षसः कौणपः क्रव्यात् क्रव्यादो सृक्प आशरः’ इत्यमरः।

**धातुरूपाणि**

भवेत् - भू सत्तायाम् - परस्मैपदि विधिलिङ् प्र. पु. ए. व ।
भवेत् - भवेतां - भवेयुः

**प्रयोगविशेषः**

- सा राक्षसानां प्रवरेण हता (कर्मणि) ।
  तां राक्षसानां प्रवरः जघान (कर्तरि) ।
- नूनम् इत्यवधारणे।

४ विरूपरूपा विकृता विवर्चसो
महानना दीर्घविरूपदर्शनाः।
समीक्ष्य सा राक्षसराजयोषितो
भयाद्विनष्टा जनकेश्वरात्मजा।।

**पदच्छेदः**

विरूपरूपा विकृता विवर्चसो महानना दीर्घविरूपदर्शनाः – विरूपरूपाः + विकृताः + विवर्चसः + महाननाः + दीर्घविरूपदर्शनाः

राक्षसराजयोषितो भयाद्विनष्टा - राक्षसराजयोषितः + भयात् + विनष्टा

**विग्रहः**

विरूपरूपाः - विगतं रूपं यस्मात् तत् विरूपं, विरूपं रूपं यासां ताः।।

महाननाः - महान्ति आननानि यासां ताः ।

दीर्घविरूपदर्शनाः - दीर्घे विरूपे च दर्शने यासां ताः।

राक्षसराजयोषितः - राक्षसानां राजा राक्षसराजः, तस्य योषितः।

| अन्वयः | अन्वयार्थः |
|---|---|
| विरूपरूपाः | विरूपाः |
| विकृताः | विकलरूपाः |
| विवर्चसः | तेजोहीनाः |
| महाननाः | बृहन्मुखीः |
| दीर्घविरूपदर्शनाः | प्रांशुविकृतरूपिणीः |
| राक्षसराजयोषितः | रावणपरिचारिकाः |
| समीक्ष्य | अवलोक्य |
| जनकेश्वरात्मजा | जानकी |
| भयात् | भीत्या |
| विनष्टा(भवेत् इति चिन्तयामास)। | विपन्ना (इति अमन्यत) । |

**भावार्थः**

विरूपिणीः विकृताः लावण्यरहिताः (तेजोहीनाः) महाशिरस्काः(महावक्त्राः) दुर्दर्शनाः (दुर्निरीक्ष्याः) च दशानननारीः दृष्ट्वा जनकात्मजा सीता भीत्या मृता भवेत् इति हनुमान् चिन्तयामास ।

**कोशः**

आननम् - ‘ वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्’ इत्यमरः।

५ **सीतामदृष्ट्वा ह्यनवाप्य पौरुषं**
**विहृत्य कालं सह वानरैश्चिरम्।**
**न मेऽस्ति सुग्रीवसमीपगा गतिः**
**सुतीक्ष्णदण्डो बलवांश्च वानरः।।**

**पदच्छेदः**

| | | | | |
|---|---|---|---|---|
| ह्यनवाप्य | - | हि | + | अनवाप्य |
| वानरैश्चिरम् | - | वानरैः | + | चिरम् |
| मेऽस्ति | - | मे | + | अस्ति |
| सुतीक्ष्णदण्डो बलवांश्च | - | सुतीक्ष्णदण्डः | + | बलवान् + च |

**विग्रहः**

| | | |
|---|---|---|
| अनवाप्य | - | न अवाप्य। |
| पौरुषम् | - | पुरुषस्य भावः। |
| बलवान् | - | बलम् अस्य अस्तीति । |
| सुग्रीवसमीपगा | - | सुग्रीवस्य समीपं गच्छति या सा । |
| सुतीक्ष्णदण्डः | - | सुतीक्ष्णं दण्डं यस्य सः। |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| चिरं कालम् | बहुकालम् |
| वानरैः सह | कपिभिः समम् |

| | |
|---|---|
| विहृत्य | विहारं कृत्वा |
| सीतां | जानकीं |
| अदृष्ट्वा | न पश्यन् |
| पौरुषं | पुरुषोचितं तेजः |
| अनवाप्य | अप्राप्य |
| मे | मम(हनुमतः) |
| सुग्रीवसमीपगा | सुग्रीवसकाशगमनोचिता |
| गतिः | सरणिः |
| न | नैव |
| अस्ति | भवति । |
| हि | निश्चयेन (यतः) |
| वानरः | सुग्रीवः |
| सुतीक्ष्णदण्डः | तीक्ष्णदण्डप्रदः |
| बलवान् च । | बलशाली च । |

**भावार्थः**

बाल्यादारभ्य एतावत्कालं वानरैः सह विहारं कृत्वा यत्किमपि कर्तुं समर्थः इति ख्यातिं प्राप्तवान्। अतः तैः सीतान्वेषणाय नियुक्तः अहम् अधुना जानकीम् अदृष्ट्वा प्रत्यागच्छामि चेत् नष्टपौरुषः इति अपख्यातिं प्राप्य सुग्रीवस्य समीपं गन्तुं कथं शक्नोमि ? यतः सः उग्रदण्डः बलवान् च भवति ।

**कोशः**

पौरुषम् - 'पुंभावे तत्क्रियायां च पौरुषम् ' इत्यमरः।

**व्याकरणविशेषः**

"सहयुक्तेऽप्रधाने" इति सूत्रेण (समं साकं सार्धं सह)सहशब्दयोगे वानरैः इति तृतीया ।

६ **दृष्टमन्तःपुरं सर्वं**
**दृष्टा रावणयोषितः।**
**न सीता दृश्यते साध्वी**
**वृथा जातो मम श्रमः।।**

**पदच्छेदः**

| | | |
|---|---|---|
| दृष्टा रावणयोषितः | - | दृष्टाः + रावणयोषितः |
| जातो मम | - | जातः + मम |

**विग्रहः**

| | | |
|---|---|---|
| रावणयोषितः | - | रावणस्य योषितः। |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| अन्तःपुरम् | राजस्त्रीणां वासस्थानं /राजनारीगृहम् |
| सर्वम् | समस्तम्(सम्पूर्णं) |
| दृष्टम् | अवलोकितम् |
| रावणयोषितः | दशाननस्य वध्वः |
| दृष्टाः | अवलोकिताः |
| साध्वी | पतिव्रता |
| सीता | जानकी |
| न | नैव |
| दृश्यते | अवलोक्यते |
| मम | मम(हनुमतः) |
| श्रमः | प्रयत्नः |
| वृथा | व्यर्थः |
| जातः । | अभवत् । |

**भावार्थः**

लङ्कायां राजान्तःपुरं सर्वं तथा रावणस्त्रियः सर्वाः अपि मया दृष्टाः । किन्तु सुशीला मैथिली एव न दृष्टा इत्यतः मम प्रयत्नः विफलः संजातः।

**कोशः**

योषित् - 'स्त्री योषिदबलायोषा नारी सीमन्तिनी वधूः' इत्यमरः.।

**धातुरूपाणि**

दृश्यते - दृशिर् प्रेक्षणे धातोः आत्मनेपदिनि लटि प्र.पु.ए.व। कर्तरि पश्यति।

७ **किं वा वक्ष्यति वृद्धश्च**
**जाम्बवानङ्गदश्च सः।**
**गतं पारं समुद्रस्य**
**वानराश्च समागताः।।**

**पदच्छेदः**

| | | |
|---|---|---|
| वृद्धश्च | - | वृद्धः + च |
| जाम्बवानङ्गदश्च | - | जाम्बवान् अङ्गदः + च |
| वानराश्च | - | वानराः + च |

| अन्वयः | अन्वयार्थः |
|---|---|
| समुद्रस्य | सागरस्य |
| पारं | अपरं तीरं |
| गतं (मां) | प्रतिनिवृत्तं मां |
| समागताः | आगताः |
| वानराः च | कपयः(च) |

| | |
|---|---|
| सः अङ्गदः च | (मम सुहृद्) अङ्गदः च |
| वृद्धः | वयोवृद्धः (परिणतप्रज्ञः वा) |
| जाम्बवान् च | जाम्बवान् च |
| किं वा | किम् वा |
| वक्ष्यति । | कथयिष्यति (निन्दापूर्वम्) । |

**भावार्थः**

सीतामदृष्ट्वा प्रतिगच्छन्तं मां समुद्रतीरे स्थिताः सर्वे वानराः अङ्गदः वृद्धो(परिणतप्रज्ञः)जाम्बवान् च संभूय वा किं वक्ष्यति? परिहासेन किं किं न कथयिष्यन्ति? इति हनुमान् चिन्तयति।

**कोशः**

समुद्रः - समुद्रोऽब्धिरकूपारः पारावारस्सरित्पतिः ।

८ **अनिर्वेदः श्रियो मूल-**
**मनिर्वेदः परं सुखम्।**
**अनिर्वेदो हि सततं**
**सर्वार्थेषु प्रवर्तकः।।**

**पदच्छेदः**

| | | |
|---|---|---|
| श्रियो मूलमनिर्वेदः | - | श्रियः + मूलम् अनिर्वेदः |
| अनिर्वेदो हि | - | अनिर्वेदः + हि |

**विग्रहः**

| | | |
|---|---|---|
| अनिर्वेदः | - | न निर्वेदः (निर्गतो वेदो यस्मात् सः निर्वेदः)। |
| प्रवर्तकः | - | प्रवर्तयति यः सः । |
| सर्वार्थेषु | - | सर्वेषु अर्थेषु । |

| अन्वयः | अन्वयार्थः |
| --- | --- |
| अनिर्वेदः | स्वावमानराहित्यम्(जागरूकता) |
| श्रियः | ऐश्वर्यस्य |
| मूलम् | निदानम् |
| अनिर्वेदः | जागरूकता |
| परं | सर्वोत्कृष्टम् |
| सुखम् | सुखम् |
| सततं | सर्वदा(नित्यम्) |
| सर्वार्थेषु | सर्वपुरुषार्थेषु |
| प्रवर्तकः | नियोजकः (भवति) |
| अनिर्वेदः हि | अविरामप्रयत्नः एव। |

**भावार्थः**

निराशारहितः(निस्तन्द्रः/अक्षीणः) प्रयत्नः एव सम्पदां सुखस्य च कारणम्। तथा सर्वार्थेषु प्रयोजकः(प्रवर्तकः) च भवति अविरामप्रयत्नः। अर्थात् सीतादर्शनपर्यन्तं यत्नः करणीयः इति हनूमान् चिन्तयति।

**कोशः**

श्रीः - लक्ष्मीः पद्मालया पद्मा कमला श्रीः हरिप्रिया' ।

सुखम् - स्यादानन्दथुरानन्द शर्मशातसुखानि च' ।

(अमरकोशः)

**९ करोति सफलं जन्तोः**
**कर्म यत्तत् करोति सः।**
**तस्मादनिर्वेदकृतं**
**यत्नं चेष्टेऽहमुत्तमम्।।**



**पदच्छेदः**

| | | | | |
|---|---|---|---|---|
| यत्तत् | - | यत् | + | तत् |
| चेष्टेऽहमुत्तमम् | - | चेष्टे | + | अहम् उत्तमम् |

**विग्रहः**

| | | |
|---|---|---|
| सफलम् | - | फलेन सह वर्तते यस्मिन् कर्मणि इति। |
| अनिर्वेदकृतम् | - | न निर्वेदः अनिर्वेदः , तेन कृतम्। |

| अन्वयः | अन्वयार्थः |
|---|---|
| जन्तोः | प्राणिनः |
| कर्म | प्रयत्नः |
| यत् | यादृशम् |
| कर्म | प्रवर्तनम् |
| सफलं करोति | फलपूर्णं कल्पयति |
| सः | देही |
| तत् | तादृशं कर्म |
| करोति | आचरति |
| तस्मात् | तस्मात्कारणात् |
| अहम् | हनुमान् |
| अनिर्वेदकृतम् | अविरामपूर्वम् (सोत्साहम्) |
| उत्तमम् | महनीयम् |
| यत्नम् | कर्म |
| चेष्टे । | करोमि । |

**भावार्थः**

यत् यत् कर्म सफलं भवति तत् तत् कर्म एव जन्तुः आचरति। अतः अहं (हनुमान्) निराशारहितं सोत्साहं प्रयत्नं कर्तुम् इच्छामि। (अर्थात् पुनरपि प्रत्याशापूर्वं सीतान्वेषणं करोमि इति)

**कोशः**

जन्तुः - प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः' इत्यमरः

**धातुरूपाणि**

चेष्टे - चेष्ट चेष्टायाम् आत्मनेपदी लट् उ. पु. ए. व ।

चेष्टे - चेष्टावहे - चेष्टामहे । (प्र.पु. ए. व. चेष्टते)

१० **इति सञ्चिन्त्य ववृधे**
**विचेतुमुपचक्रमे।**
**भूयश्चापि विचेष्यामि**
**न यत्र विचयः कृतः ।।**

**पदच्छेदः**

भूयश्चापि - भूयः + च + अपि

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| यत्र | यस्मिन् भागे |
| विचयः | अन्वेषणम् |
| न कृतः (तत्र) | न अनुष्ठितम् (तत्र) |
| विचेष्यामि | अन्विष्यामि |
| इति | इत्येवम् |
| सञ्चिन्त्य | विचिन्त्य |

| | |
|---|---|
| ववृधे | प्रवृद्धः अभवत् (मनसा शरीरेण च वर्धितः इत्याशयः) |
| अपि च | तथैव |
| भूयः | पुनः पुनः (सम्यक्) |
| विचेतुम् | अन्वेष्टुम् |
| उपचक्रमे । | आरेभे। |

**भावार्थः**

पूर्वोक्तप्रकारेण सम्यक् विचार्य इतः पर्यन्तं यत्र यत्र न अन्वेषणं कृतं तत्र तत्र सविस्तरम् अन्वेष्यामि इति निश्चित्य स हनुमान् मनसा शरीरेण च वर्द्धितवीर्यः पुनः पुनः विचयनं कर्तुं समारेभे।

**कोशः**

भूयः - 'मुहुर्भूयः पुनः शश्वदभीक्ष्णमसकृत्समाः' इत्यमरः।

**धातुरूपाणि**

ववृधे - वृधु वृद्धौ धातोः लिट् आत्मनेपदि प्र. पु. ए. व।

विचेष्यामि - वि उपसर्ग चिङ् चयने धातोः लृट् परस्मैपदि उ. पु. ब. व।

उपचक्रमे - उपपूर्वक क्रमुधातोः 'प्रोपाभ्यां समर्थाभ्याम्' इति सूत्रेण आत्मनेपदित्वम् लिट् प्र. पु. ए. व।

**पठनप्रवर्तनानि**

**श्लोकान् सतालम् आलपतु ।**

श्रद्धेयाः अंशाः

उचितः तालः।

भावात्मकता।

शुद्धोच्चारणम्।

**श्लोकानाम् आशयं संगृह्य वदतु लिखतु ।**

श्रद्धेयाः अंशाः

आशयपूर्तिः।

भाषाशुद्धिः।

संक्षेपस्य औचित्यम्।

**जीवितविजयाय प्रेरणादायकानि सुभाषितानि सञ्चित्य लिखतु।**

श्रद्धेयाः अंशाः

विषयानुबन्धित्वम्।

आशयावगतिः।

वैविध्यम्।

**भवताम् इष्टतमं श्लोकं सञ्चित्य आस्वादनटिप्पणीं लिखतु।**

श्रद्धेयाः अंशाः

उचितश्लोकस्वीकारः।

आशयपूर्णता।

भाषाप्रयोगः।

## अभ्यासपत्रिका -२

१) अव्ययानां पट्टिकां करोतु।

| क्त्वान्तम् | ल्यबन्तम् | तुमुन्नन्तम् |
|---|---|---|
| | | |

२) पाठभागात् सम्बोधनप्रथमारूपाणि चित्वा लिखतु।

३) सूचनानुसारं श्लोकस्य आशयं लिखतु।

**अनिर्वेदः श्रियो मूल-**

**मनिर्वेदः परं सुखम्।**

**अनिर्वेदो हि सततं**

**सर्वार्थेषु प्रवर्तकः।।**

सूचना- अनिर्वेदः ......... .............। ........परम् .......।

................ ............. अनिर्वेदः हि।

४) वाक्येषु योजयत।

अ) अनवाप्य।

आ) जगाम।

५) कथास्तम्भं क्रमीकुरुत।

- अन्ते शूरः राक्षसस्य शिरः बाणेन अच्छिनत्।
- देवस्वामी नाम पुत्रः सोमप्रभा नाम पुत्री च आस्ताम्।
- हरिस्वामी प्रत्यागत्य यथाकृतं सर्वं पुत्रं भार्यां च अकथयत्।
- कथामिमामाख्याय वेतालः राजानं पप्रच्छ।
- सप्तमे दिने विवाहार्थम् आगच्छ" इति हरिस्वामी अवदत् ।

## शब्दकोशः

| | | | | |
|---|---|---|---|---|
| अनवाय | अप्राप्य | ലഭിക്കാതിരുന്നിട്ട് | Having not attained | ಪಡೆಯದಿದ್ದಾಗ |
| अन्तःपुरम् | राजस्त्रीणां | രാജസ്ത്രീകളുടെ | | ರಾಣಿಯರ |
| | वासस्थानम् | വാസസ്ഥലം | Hare | ಅಂತಃ ಪುರ |
| अहः | दिनम् | ദിവസം | Day | ದಿನ |
| अनिर्वेदः | अवैराग्यं | ഉത്സാഹത്തോടു | | |
| | | കൂടിയ ശ്രദ്ധ | Non dispression | ನಿರಾಶೆ |
| आर्यपथे | श्रेष्ठमार्गे | ശ്രേഷ്ഠമായ | | ಒಳ್ಳೆಯ |
| | | മാർഗ്ഗത്തിൽ | Correct way | ಮಾರ್ಗದಲ್ಲಿ |
| उपक्रमे | आरेभे | ആരംഭിച്ചു | Begun | ಪ್ರಾರಂಭಿಸಿದ |
| कृतकार्याः | कृतकृत्याः | ഏൽപ്പിക്കപ്പെട്ട ജോലി | One has done the | ಜವಾಬ್ದಾರಿಯಿಂದ |
| | | നിർവഹിച്ചവൻ | work attained to him | ಕೆಲಸವನ್ನು |
| | | | | ಮಾಡುವವನು |
| गतिः | अवस्था | അവസ്ഥ | Stage | ಅವಸ್ಥೆ |
| गूढस्था | गूढं स्थिता | രഹസ്യമായി ഉള്ളവൾ | Alady who is in hide | ಗುಪ್ತವಾಗಿ ಇರುವವಳು |
| चित्रगृहम् | चित्रैरलङ्कृतं | നിറങ്ങൾകൊണ്ട്മോടി | Colourful | |
| | भवनम् | പിടിപ്പിച്ച വീട് | mansions | ವರ್ಣರಂಜಿತವಾದ ಮನೆ |
| चेष्टे | अहं कुर्वे | ചെയ്യുന്നു | Do | ಮಾಡುವುದು |
| जानकी | सीता | സീത | Seetha | ಸೀತೆ |
| देहपणोद्यमः | देहविनिमयोत्सुकः | ശരീരത്തെ കടമായി | One who is willing | ದೇಹವನ್ನು |
| | | നല്കിയവൻ | to give his body | ಸಾಲವಾಗಿ ಕೊಟ್ಟವನು |
| निकृता | विकृतरूपिण्यः | വികൃതമായ രൂപമുള്ളവർ | Disfigured | ವಿಕೃತರೂಪ |
| निशागृहं | रात्रिगृहम् | രാത്രിഗൃഹം | Night homes | ನಿಶಾಗೃಹ |
| परम् | अत्युत्तमम् | ഉത്തമം | Best | ಅತ್ಯುತ್ತಮ |
| पारम् | तत्तीरम् | മറുകര | The other bank | ಇನ್ನೊಂದು ತೀರ |

| | | | | |
|---|---|---|---|---|
| प्रतिदुष्टकर्म | हीनकर्मः | ഹീനമായ പ്രവൃത്തി ചെയ്യുന്നവൻ | Wicked | ಅಧರ್ಮ |
| प्रवरः | श्रेष्ठः | ശ്രേഷ്ഠൻ | Great | ಶ್ರೇಷ್ಠ |
| भुवनविश्रुता | लोकप्रसिद्धा | ലോകപ്രസിദ്ധമായ | World famous | ಲೋಕಪ್ರಸಿದ್ಧವ |
| भ्रान्तमनः | भ्रान्तचित्तः | അസ്വസ്ഥമായ മനസ്സോട് കൂടിയവൻ | Insane | ವ್ಯಾಕುಲಮನಸ್ಸಿನಿಂದ ಕೂಡಿದವನು |
| महाकपिः | कपिश्रेष्ठः | വാനരവീരൻ | Gigantic monkey | ವಾನರವೀರ |
| महाननाः | विपुलवक्त्रः | വലിയമുഖമുള്ളവർ | Having over sized head | ದೊಡ್ಡದಾದ ಮುಖವಿರುವವನು |
| मारुतिः | हनुमान् | ഹനുമാൻ | Lord Hanuman | ಹನುಮಂತ |
| मैथिली | सीता | സീത | Seetha | ಸೀತೆ |
| यत्नः | प्रयत्नः | പ്രയത്നം | Effort | ಪ್ರಯತ್ನ |
| योधयामास | युयुधे | യുദ്ധം ചെയ്തു | Fought | ಯುದ್ಧಮಾಡಿತು |
| विचेतुम् | अन्वेष्टुम् | അന്വേഷിക്കുന്നതിന് | To search | ಅನ್ವೇಷಿಸು |
| विवर्चस | तेजोहीनाः | തേജസ്സ് നഷ്ടപ്പെട്ട | Those who are without splendour | ಕಾಂತಿ ನಷ್ಟವಾದ |
| विचयः | गवेषणम् | അന്വേഷണം | Search | ಹುಡುಕು |
| व्योमरथं | व्योमयानम् | ആകാശരഥം | Arial chariot | ಆಕಾಶ ರಥ |
| ववृधे | वृद्धिं प्राप | വളർന്നു വന്നു | Great | ವೃದ್ಧಿಯಾದ |
| श्रमः | प्रयत्नः | പ്രയത്നം | Effort | ಪ್ರಯತ್ನ |
| श्रीः | ऐश्वर्यम् | ഐശ്വര്യം | Prospirity | ಐಶ್ವರ್ಯ |
| साध्वी | पतिव्रता | പതിവ്രത | Virtous women | ಪತಿವ್ರತೆ |
| सुतीक्ष्णदण्डः | कर्कशदण्डदाता | കടുത്ത ശിക്ഷനൽകുന്നവൻ | One who gives bitter punishment | ಕಠಿನಶಿಕ್ಷೆ |

# किमधिगतम्

**निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√ ) क्रियताम्**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १ | | | | | |
| २ | | | | | |
| ३ | | | | | |
| ४ | | | | | |
| ५ | | | | | |
| ६ | | | | | |

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।



**आमुखम्**

कुसुमानां महत्वं षट्पदाः मकरन्दात् प्रत्यभिजानन्ति। संस्कृतपिपठिषवः वयन्तु संस्कृतकुसुमानां महत्वं काव्यरूपेभ्यः विज्ञानरूपेभ्यश्च मकरन्देभ्यः प्रत्यभिजानीमः। मकरन्दनामके एककेऽस्मिन् त्रयः पाठाः समायोजिताः। विज्ञानमण्डले संस्कृतस्य योगदानं परिचाययितुं **विगणितं वा गणितम्** इत्युपन्यासपाठः कुमारसम्भवात् समाकलितः **वसन्तागमः** इति काव्यपाठः निरुक्तादीनां परिचायनाय **शास्त्रं विज्ञानपूर्तये** इति विवरणपाठश्च अस्मिन्नन्तर्भवन्ति।



एककम् ३

# मकरन्दः

**पठनाधिगमाः**

- ☐ प्रधानाशयान् सङ्गृह्य टीकां लिखति।
- ☐ सूचनानुसारमुपन्यासं लिखति।
- ☐ गणितशास्त्रज्ञानां नामानि तेषां ग्रन्थनामानि च पट्टिकारूपेण लिखति।
- ☐ काव्यभागं पठित्वा अन्वयमाशयञ्च लिखति।
- ☐ श्लोकानां गणक्रममनुसृत्य वृत्तानि निर्णीय लिखति।
- ☐ अलङ्कारान् विविच्य लिखति।
- ☐ सूचनानुसारं लघुविवरणं लिखति।

**प्रवेशकः** भारतीयगणितशास्त्रज्ञानां पट्टिकां कुरुत।

पाठः ६

# विगणितं वा गणितम्?




*विद्यालयीयप्रातःसभायां भवन्तः प्रतिज्ञान्तर्गतानि वाक्यान्येवमुच्चरन्ति किल? - अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायाञ्च पूर्विकसम्पत्तौ अभिमानी च भवामीति। पूर्वाणामस्माकं बौद्धिकसम्पदमधिकृत्य भवन्तः जानन्ति वा? नो चेत् अधो दत्तं गणितशास्त्रविषयकं निबन्धं पठन्तु। पुनः इतरविषयेष्वपि भारतस्य योगदानमधिकृत्य सूचनाः नूनमन्विष्यन्ति किल?*

विश्वे प्रथमं स्थापितः विश्वविद्यालयः आसीत् तक्षशिला नाम। क्रिस्तोः पूर्वं सप्तशतके तक्षशिलायां षष्ठ्यधिकेषु विषयेषु दशसहस्राधिकाः छात्राः पठन्तः आसन्निति प्राचीनरेखासु द्रष्टुं शक्यते। तथा च बि.सि. चतुर्थे शतके स्थापितः नालन्दाख्यः विश्वविद्यालयः भारतस्य अभिमानस्तम्भः आसीत्। विश्वे स्थिताः अधुनातन-परिष्कृतजनविभागाः बहवोऽपि यदा वनवासिनः आसन् तदा (५००० वर्षात्पूर्वमेव) अत्र सिन्धुनदीतटसंस्कृतिरुल्लसिता। विज्ञानविनिमये भारतस्य योगदानं निस्तुलमेव, विशिष्य गणितशास्त्रे। विश्वविख्यातस्य वैदेशिकस्य आल्बर्ट् ऐन्स्टयिन् महाशयस्य वचनानि शृण्वन्तु।

***भारतं प्रति अस्माकम् आधमर्ण्यं महदस्ति। यतः भारतमेवास्मान् गणितमपाठयत्, यद्विना गणनीया शास्त्रपुरोगतिः असाध्यमासीत्।***

विज्ञानिनः ऐन्स्टयिन्महाशयस्य वचांसि केवलप्रशंसा न किन्तु परमार्थ एव। तत्कथमिति पश्यामेदानीम्। संख्याव्यवस्था भारत एव आविर्भूता। शून्यस्य आविष्कर्ता खलु भारतीयः। गणिते शून्य इत्याशयस्य आविष्कारेण समुपजाता विप्लवात्मिका प्रोन्नतिः अवर्णनीया एव। विश्वप्रसिद्धः ज्योतिशास्त्रज्ञः आर्यभटः नालन्दा नाम विश्वविद्यालये आचार्यपदवीमलञ्चकार। गणितशास्त्रेऽपि तस्य अतुलं पाण्डित्यमासीत्। वस्तुतः ज्योतिशास्त्राद्यनेकानि इतराणि शास्त्राणि गणिते अधिष्ठितान्येव। भूमेः सूर्यकेन्द्रितभ्रमणाय अपेक्षितः समयः ३६५.२५८७५६४८४ दिनानीति शताब्देभ्यः पूर्वमेव भारतीयेन भास्कराचार्येण क्लृप्ततया परिगणितः। दशांशसदृशाः गणितसङ्केताः क्रिस्तोः पूर्वं ५०० तमे काल एव भारते प्रयोगे आसन्। पै इत्याशयस्य मूल्यं प्रथमतया बोधायनेन निर्णीतम्। बि. सि. षष्ठशतके यूरोपियानां यदा गणितमज्ञातमासीत् तदा अनन्तरकालिकस्य पैतगोरियन् सिद्धान्तस्य

मूलतत्त्वाविष्करणे विशदीकरणे च बोधायनः समर्थः आसीत्। बीजगणितस्य त्रिकोणमितेः काल्कुलस् इत्यस्य च प्रभवस्थानं भारतमेव। एकादशशतके श्रीधराचार्येण चतुष्कोणमितेः समवाक्यम् आविष्कृतमिति गणितज्ञैरङ्गीकृतमेव।

प्राचीनरोमादेशीयानां तथा ग्रीक्देशवासिनां वा १०६ इत्यतः परं संख्याबोधः यथा न बभूव तदा भारतीयानामस्माकं त्रिवारं परस्परगुणितं पञ्चाधिकशतपर्यन्तानां संख्यानां ($१०५^{३}$) परिज्ञानमजायत। अद्यापि गणिते उपयुज्यमानासु संख्यासु बृहत्तमा भवति $१०५^{३}$ इति चात्र स्मर्तव्या। भोः छात्राः! अत्रोक्तं सर्वमवगतं वा? तर्हि उच्चैः वदन्तु - वयं *भारतीयविज्ञानसम्पदि अभिमानिनः भवामः* इति।

**पदच्छेदः**

| | |
|---|---|
| षष्ठ्यधिकेषु | - षष्ठि + अधिकेषु |
| आसन्निति | - आसन् + इति |
| बहवोऽपि | - बहवः + अपि |
| संस्कृतिरुल्लसिता | - संस्कृतिः + उल्लसिता |
| महदस्ति | - महत् +अस्ति |
| यद्विना | - यत् + विना |
| पश्यामेदानीम् | - पश्याम + इदानीम् |
| ज्योतिशास्त्राद्यनेकानि | - ज्योतिशास्त्रादि + अनेकानि |
| अधिष्ठितान्येव | - अधिष्ठितानि + एव |
| इत्याशयस्य | - इति + आशयस्य |
| गणितज्ञैरङ्गीकृतम् | - गणितज्ञैः + अङ्गीकृतम् |

**विग्रहवाक्यानि**

| | |
|---|---|
| वनवासिनः | - वने उषितुं शीलं येषां ते। |
| शास्त्रपुरोगतिः | - शास्त्रस्य पुरोगतिः। |

वैदेशिकस्य - विदेशे भवः इति वैदेशिकः, तस्य।

संख्याव्यवस्था - संख्यायाः व्यवस्था

## पठनप्रवर्तनानि

**पाठभागं पठित्वा आशयव्यञ्जकसमर्थान् प्रश्नान् लिखित्वा प्रश्नोत्तरकेलिं प्रचालयतु।**

श्रद्धेयाः अंशाः

आशयग्रहणम्

प्रश्ननिर्माणसामर्थ्यम्।

सर्वेषां भागभाग्त्वम्।

**पाठभागं पठित्वा प्रधानाशयान् वार्तारूपेण लिखित्वा वार्तापत्रं प्रकाशयतु।**

श्रद्धेयाः अंशाः

वार्तायाः घटना।

भाषाशुद्धिः।

आशयपूर्णता।

**गणितशास्त्रे भारतीयानां योगदानमधिकृत्य चर्चां नयतु।**

श्रद्धेयाः अंशाः

प्रश्नानाम् आशयव्यञ्जकसामर्थ्यम्।

भाषाशुद्धिः।

आशयसमग्रता।

प्रश्नोन्नयननैपुणी।

चाक्रिकारोहणप्रक्रिया – **पूर्वकक्ष्यायां पठितानां संस्कृतश्लोकानां चयनं प्रकाशनं च करोतु।**

पाठः ७

# वसन्तागमः ।



कालिदासविरचितं महाकाव्यं भवति कुमारसम्भवम्। कुमारस्य सम्भवः कुमारसम्भवः तदधिकृत्य कृतं काव्यं कुमारसम्भवम्। काव्येऽस्मिन् सप्तदशसर्गाः सन्ति। किन्त्वष्टसर्गपर्यन्ता कथा एव कालिदासेन विरचितेति विदुषां मतम्। कामदेवसुहृदः ऋतुराजस्य समागमेन हरस्य तपोवनं कीदृशं रमणीयं परिणतमिति वर्णितमत्र ।

**असूत सद्य कुसुमान्यशोकः**
**स्कन्धात्प्रभृत्येव सपल्लवानि।**
**पादेन नापैक्षत सुन्दरीणां**
**सम्पर्कमाशिञ्जितनूपुरेण।। १।।**

### पदच्छेदः

| | |
|---|---|
| कुसुमान्यशोकः | – कुसुमानि + अशोकः। |
| स्कन्धात्प्रभृत्येव | – स्कन्धात् + प्रभृति + एव। |
| नापैक्षत | – न + अपेक्षत। |

| अन्वयः | अन्वयार्थः |
|---|---|
| अशोकः | वृक्षविशेषः। |
| सद्य | झटिति। |
| स्कन्धात् प्रभृति एव | प्रकाण्डात् आरभ्य एव। |
| सपल्लवानि | किसलयसहितानि। |
| कुसुमानि | पुष्पाणि। |
| असूत | प्रसूत। |
| आशिञ्जितनूपुरेण | शब्दायमाननूपुरेण (मञ्जीरेण)। |
| सुन्दरीणाम् | मोहिनीनाम्। |
| पादेन सम्पर्कम् | पादाघातः। |
| न अपैक्षत | आवश्यकं नाभवत्। |

### विग्रहवाक्यानि

सपल्लवानि – पल्लवेन सह वर्तते इति सपल्लवम्, तानि।

आशिञ्जितनूपुरेण – आसमन्तात् शिञ्जितः नूपुरः यस्य, तेन।

### आशयः

वसन्तस्य आगमनेन हरस्य तपोवनस्थाः अशोकवृक्षाः स्कन्धात् आसमन्तात् पल्लविताः कुसुमिताः चाभवन्। वसन्तागमनेन सुन्दरीणां पादाघातं विनैव अशोकस्य पुष्पोद्गमोऽभवत्। (सुन्दरीणां दोहदाचरणेन अशोकेषु पुष्पागमः भवेदिति प्रसिद्धिरस्ति।)

### धातुरूपम्

*अपैक्षत* – अप उपसर्गक ईक्ष दर्शने इति धातोः आत्मनेपदी लङ् प्र.पु.ए.व.।

**वृत्तम्**

श्लोकेऽस्मिन् इन्द्रवज्रोपेन्द्रवज्रावृत्तयोः सङ्करः। अतः उपजातिः नाम वृत्तम्।

**सद्यः प्रवालोद्गमचारुपत्रे**
**नीते समाप्तिं नवचूतबाणे ।**
**निवेशयामास मधुर्द्विरेफा-**
**न्नामाक्षराणीव मनोभवस्य।। २।।**

**पदच्छेदः**

मधुर्द्विरेफान्नामाक्षराणीव - मधुः + द्विरेफान् + नामाक्षराणि +इव।

| अन्वयः | अन्वयार्थः |
|---|---|
| मधुः | वसन्तः |
| प्रवालोद्गमचारुपत्रे | किसलयानामाविर्भावेन चारुपत्रयुक्ते |
| नवचूतबाणे | नूतनचूतास्त्रे |
| समाप्तिम् नीते सति | विन्यस्ते सति |
| सद्यः | झटिति |
| मनोभवस्य | कामदेवस्य |
| नामाक्षराणि इव | नाम्नो वर्णानि इव |
| द्विरेफान् | भ्रमरान् |
| निवेशयामास | आयोजितवान् |

**विग्रहवाक्यम्**

| | |
|---|---|
| नवचूतबाणे | – नवं च तत् चूतञ्च नवचूतम्, तदेव बाणः, तस्मिन्। |
| प्रवालोद्गमचारुपत्रे | – प्रवालस्य उद्गमः प्रवालोद्गमः, स एव चारुपत्राणि यस्य तस्मिन्। |

**आशयः**

नवकिसलयमनोज्ञकङ्कपत्रे नवचूतबाणे सुसज्जे (सति) झटित्येव ऋतुराजः स्वसख्युः मनोभवस्य नामाक्षराणि अङ्कितानि इव भ्रमरांस्तत्र निवेशयामास।



## वृत्तम्

उपजातिः

वर्णप्रकर्षे सति कर्णिकारं
दुनोति निर्गन्धतया स्म चेतः।
प्रायेण सामग्र्यविधौ गुणानां
पराङ्मुखी विश्वसृजः प्रवृत्तिः।। ३।।

| अन्वयः | अन्वयार्थः |
| --- | --- |
| कर्णिकारम् | कर्णिकारकुसुमम्। |
| वर्णप्रकर्षे सति | उत्कृष्टवर्णसहिते सत्यपि। |
| निर्गन्धतया | गन्धराहित्येन। |
| चेतः | मनः। |
| दुनोति स्म | अतापयत्। |
| प्रायेण | प्रायः। |
| विश्वसृजः | विधातुः। |
| प्रवृत्तिः | वृत्तिः। |
| गुणानां सामग्र्यविधौ | गुणानां साकल्यसम्पादनविषये। |
| पराङ्मुखी (भवति) | विमुखः (भवति)। |

## वग्रहवाक्यानि

निर्गन्धतया – निर्गतः गन्धः यस्मात् तत् निर्गन्धम्, तस्य इयं निर्गन्धता, तया।

विश्वसृजः – विश्वं सृजति इति विश्वसृक् , तस्य।

## आशयः

कर्णिकारकुसुमम् उत्कृष्टवर्णसहितः भवति। किन्तु तस्मिन् सुगन्धः नास्ति इति हेतोः सहृदयानां मनः आकुलतां करोति। प्रायेण गुणपूरणकार्ये विधाता विमुखः भवति इति।

## वृत्तम्

उपजातिः

**अलङ्कारः**

प्रायेण विश्वसृजः प्रवृत्तिः गुणानां सामग्र्यविधौ पराङ्मुखी इति सामान्येन वर्णप्रकर्षे सति निर्गन्धतया कर्णिकारं दुनोति इति विशेषसमर्थनात् अर्थान्तरन्यासालङ्कारः।

**व्याकरणाकार्यम्**

दुनोति स्म – लट् स्मे इत्यनेन भूतार्थः सिद्ध्यति।

दुनोति – डुदु उपतापे परस्मैपदी लट् प्र.पु.ए.व।

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र.पु | दुनोति | दुनुतः | दुन्वन्ति |
| म.पु | दुनोषि | दुनुथः | दुनुथ |
| उ.पु | दुनोमि | दुन्वः, दुनुवः | दुन्मः, दुनुमः। |

**मृगाः प्रियालद्रुममञ्जरीणां**
**रजः कणैर्विघ्नितदृष्टिपाताः।**
**मदोद्धताः प्रत्यनिलं विचेरु–**
**र्वनस्थलीर्मर्मरपत्रमोक्षाः।। ४**

**पदच्छेदः**

रजःकर्णैर्विघ्नितदृष्टिपाताः - रजःकणैः + विघ्नितदृष्टिपाताः

विचेरुर्वनस्थलीर्मर्मरपत्रमोक्षाः - विचेरुः+वनस्थलीः +मर्मरपत्रमोक्षाः।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| मदोद्धताः | मदोन्मत्ताः। |
| मृगाः | हरिणाः। |
| प्रियालद्रुममञ्जरीणाम् | राजादनवृक्षस्य पुष्पगुञ्जानाम्। |
| रजःकणैः | रेणुभिः। |
| विघ्नितदृष्टिपाताः | निरुद्धदृष्टयः सन्तः। |
| प्रत्यनिलम् | अनिलाभिमुखम्। |
| मर्मरपत्रमोक्षाः | मर्मरशब्दयुक्तजीर्णपर्णपतितेषु। |
| वनस्थलीः | वनप्रदेशेषु। |
| विचेरुः | चरन्ति स्म। |

### विग्रहवाक्यानि

| | |
|---|---|
| प्रियालद्रुममञ्जरीणाम् | - प्रियालद्रुमाणां मञ्जर्यः प्रियालद्रुममञ्जर्यः, तासाम्। |
| रजकणैर्विघ्नितदृष्टिपाताः | - रजःकणैः विघ्निताः दृष्टीनां पाताः। |
| प्रत्यनिलम् | - अनिलं प्रति। |

### आशयः

तदा मनोन्मत्ताः हरिणाः प्रियालपुष्परेणुभिः क्लिष्टदृष्टयः अभवन्। ते सममरैः पतितैः जीर्णपत्रैः आस्तृताः वनस्थलीः प्रत्यनिलं व्यचरन्।

### वृत्तम्

उपेन्द्रवज्रा ।

**मधु द्विरेफः कुसुमैकपात्रे**
**पपौ प्रियां स्वामनुवर्तमानः।**
**शृङ्गेण च स्पर्शनिमीलिताक्षीं**
**मृगीमकण्डूयत कृष्णसारः।। ५**

| अन्वयः | अन्वयार्थः |
|---|---|
| द्विरेफः | भ्रमरः। |
| कुसुमैकपात्रे | एकस्मिन्नेव पुष्पपात्रे। |
| मधु | मकरन्दः। |
| स्वां प्रियाम् | स्वस्य प्रियतमाम्। |
| अनुवर्तमानः | अनुगम्यमानः। |
| पपौ | अपिबत्। |
| कृष्णसारः च | कृष्णमृगः तु। |
| स्पर्शनिमीलिताक्षीम् | स्पर्शसुखेन निमीलितनेत्राम्। |
| मृगीम् | हरिणीम्। |
| शृङ्गेण | विषाणेन। |
| अकण्डूयत | गात्रविघर्षणं अकुरुत। |

### विग्रहवाक्यानि

द्विरेफः – द्वौ रेफौ यस्य सः।

स्पर्शनिमीलिताक्षीम् – निमीलिते अक्षिणी यस्याः सा निमीलिताक्षी, स्पर्शेन निमीलिताक्षी, ताम्।

### आशयः

एकस्मिन् कुसुमपात्रे प्रियामनुसरन् भ्रमरः मधु अपिबत्। कृष्णमृगस्य संस्पर्शसुखमनुभवन्तीम् अर्धनिमीलिताक्षीं कृष्णमृगीं सः स्वस्य शृङ्गाग्रेण सावधानम् अकण्डूयत।

### वृत्तम्

उपजातिः

ददौ रसात्पङ्कजरेणुगन्धि
गजाय गण्डूषजलं करेणुः।
अर्धोपभुक्तेन बिसेन जायां
सम्भावयामास रथाङ्गनामा।। ६

| अन्वयः | अन्वयार्थः |
|---|---|
| करेणुः | करिणी। |
| रसात् | अतिरागात्। |
| पङ्कजरेणुगन्धि | कमलरजकणैः सुगन्धयुक्ताम्। |
| गण्डूषजलम् | मुखान्तर्धृतजलम् (शुण्डया स्वीकृतजलम्)। |
| गजाय | द्विपाय। |
| ददौ | अयच्छत्। |
| रथाङ्गनाम | चक्रवाकः। |
| अर्धोपभुक्तेन | भुक्तार्धेन। |
| बिसेन | कमलवलयेन। |
| जायाम् | पत्नीम्। |
| सम्भावयामास च | अपूजयत् च। |

**विग्रहवाक्यानि**

पङ्कजरेणुगन्धि – पङ्के जायत इति पङ्कजम्, तस्य रेणुः पङ्कजरेणुः, तस्य गन्धः अस्य अस्ति इति।

**आशयः**

करिणी पङ्कजगन्धयुक्तं मुखान्तर्धृतजलं गजेन्द्राय अयच्छत्। तथा चक्रवाकः भुक्तार्धं बिसकिसलयं स्वप्रियायै समार्पयत्।

**वृत्तम्**

उपजातिः

**अलङ्कारः**

स्वभावोक्तिः ।

**लतागृहद्वारगतोऽथ नन्दी**
**वामप्रकोष्ठार्पितहेमवेत्रः।**
**मुखार्पितैकाङ्गुलिसंज्ञयैव**
**मा चापलायेति गणान्व्यनैषीत्।। ७**

**पदच्छेदः**

लतागृहद्वारगतोऽथ – लतागृहद्वारगतः + अथ।

मुखार्पितैकाङ्गुलिसंज्ञयैव मुखार्पितैकाङ्गुलिसंज्ञया + एव।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| अथ | अनन्तरम्। |
| लतागृहद्वारगतः | पर्णशालाद्वारम् आगतः। |
| वामप्रकोष्ठार्पितहेमवेत्रः | हेमवेत्रदण्डं वामप्रकोष्ठे धारयन् । |
| नन्दी | नन्दिकेश्वरः। |
| मुखार्पितैकाङ्गुलिसंज्ञयैव | मुखे अर्पितः तर्जनीसंज्ञया (तूष्णीं भव इति निर्देशात्)। |
| गणान् | भूतगणान् (प्रमथान्)। |
| चापलाय मा | चापलं मा कुरुत। |
| इति व्यनैषीत् | इति निर्दिष्टवान्। |

**विग्रहवाक्यानि**

वामप्रकोष्ठार्पितहेमवेत्रः – वामप्रकोष्ठे अर्पितः हेमवेत्रः यस्य सः।

**आशयः**

अनन्तरं पर्णशालाद्वारे स्थितः नन्दिकेश्वरः हेमदण्डं वामप्रकोष्ठे धारयन् मुखे अर्पितया तर्जन्या चापलं मा कुरु इति भूतगणान् शिक्षितवान्।

**वृत्तम्**

उपजातिः



**निष्कम्पवृक्षं निभृतद्विरेफं**
**मूकाण्डजं शान्तमृगप्रचारम्।**
**तच्छासनात्काननमेव सर्वं**
**चित्रार्पितारम्भमिवावतस्थे।। ८**

| अन्वयः | अन्वयार्थः |
|---|---|
| निष्कम्पवृक्षम् | कम्परहितवृक्षम्। |
| निभृतद्विरेफम् | निश्चलभृङ्गम्। |
| मूकाण्डजम् | निःशब्दपक्षिसरीसृपादिकम्। |
| शान्तमृगप्रचारम् | प्रशमितमृगोपप्लवम्। |



| | |
|---|---|
| सर्वमेव | समस्तमेव। |
| काननम् | वनम्। |
| तच्छासनात् | तस्य(नन्दीश्वरस्य)शासनात्(आज्ञया)। |
| चित्रार्पितारम्भम् इव | चित्रे लिखितवत्। |
| अवतस्थे | अतिष्ठत्। |

**आशयः**

नन्दिकेश्वरस्य आज्ञया वृक्षाः अकम्पिताः, भ्रमराः निश्चलाः, अण्डजाः निःशब्दाः, मृगाः उपप्लवरहिताः सन्तः सर्वमपि काननं चित्रे आलिखितवत् अतिष्ठन्।

**व्याकरणकार्यम्**

अवतस्थे – अव उपसर्गपूर्वक ष्ठा गति निवृत्तौ लिट्।
अव पूर्व स्था गतिनिवृत्तौ इति धातोः समवप्रविभ्यः स्थ इति सूत्रेण आत्मनेपदित्वम्।

**वृत्तम्**

इन्द्रवज्रा

**धातुरूपम्**

व्यनैषीत् वि उपसर्गपूर्वक णीञ् प्रापणे लुङ् परस्मैपदी प्र.पु.ए.व।

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र.पु | व्यनैषीत् | व्यनैष्टाम् | व्यनैषुः |
| म.पु | व्यनैषीः | व्यनैष्टम् | व्यनैष्ट |
| उ.पु | व्यनैषम् | व्यनैष्व | व्यनैष्म। |

## पठनप्रवर्तनानि

**श्लोकं सतालमालपतु।**

श्रद्धेयाः अंशाः

*स्पष्टोच्चारणम्।*
*आशयावगमनम्।*
*उचितः तालः।*

**श्लोकं पठित्वा अन्वयं लिखतु।**

श्रद्धेयाः अंशाः

पदच्छेदः

*आशयावगमः*

*कर्तृकर्मक्रियाविवेचनम्।*

**सङ्घे चर्चां कृत्वा आस्वादनटिकां लिखतु।**

मधुद्विरेफः कुसुमैकपात्रे........................।।

निष्कम्पवृक्षं..................................।।

*श्रद्धेयाः अंशाः*

*आशयग्रहणम्।*

*आस्वादनांशस्य प्रतिपादनम्।*

*सयुक्तिकचर्चा।*

*कक्ष्यायामवतारणम्।*

**वसन्तागमने वने स्थाण्वाश्रमपरिसरे किं किं सञ्जातम् इति स्ववाक्यैः लिखतु।**

*श्रद्धेयाः अंशाः*

*विषयसम्बन्धः.*

*आशयग्रहणम्।*

*संक्षिप्तलेखनम्।*

*आशयपूर्णता।*

**श्लोकं पठित्वा उपमा उत्प्रेक्षा स्वभावोक्तिः अर्थान्तरन्यासः इत्येतदलङ्कारयुक्तान् श्लोकान् चित्वा लिखतु।**

*श्रद्धेयाः अंशाः*

*उचितं चयनम्।*

*आशयग्रहमम्।*

*क्रमीकृत्यलेखनम्।*

चाक्रिकारोहणप्रक्रिया – **सुखजीवनार्थम् किं किं करणीयम्? - इति विषयमधिकृत्य चर्चां नयतु**

पाठः ८

# शास्त्रं विज्ञानपूर्तये



सङ्गीतचित्रलेखनाद्यां कलाविद्यां आयुर्वेदगणितादिकं शास्त्रं चाधिकृत्य विशिष्य यत् ज्ञानमस्ति तत् विज्ञानम् इति कथ्यते। अमरकोशकारस्तु "विज्ञानं शिल्पशास्त्रयोः धीः" इति विज्ञानपदं निर्वक्ति। सङ्गीतम्, नाट्यम्, व्याकरणम्, गणितम्, ज्योतिषम्, निरुक्तम्, वास्तु, आयुर्वेदः, अलङ्कारः इत्यादिभिः विविधविज्ञानशाखाभिः सम्पन्ना इयं संस्कृतभाषा। संस्कृतकाव्यनाटकादीनाम् अनुशीलनेन विविधशास्त्रशाखानां समान्यपरिचयोऽपि प्रायेण सिद्ध्यते। तथापि विज्ञानपूर्तये शास्त्रानुशीलनमपि अवश्यं कर्तव्यम्। अतः शास्त्रत्रयाणां दिङ्मात्रनिरूपणमत्र क्रियते।



# निरुक्तम्

षट्सु वेदाङ्गेषु अन्यतमं भवति निरुक्तम्। यस्मिन् शास्त्रे पदानाम् अर्थाः निरुच्यन्ते -निश्शेषेण उच्यन्ते- तन्निरुक्तशास्त्रं भवति। पदानाम् अवयवार्थनिर्वचनमेव निरुक्तशास्त्रस्य मुख्यो विषयः। ब्राह्मणेषु एतादृश्याः अर्थकल्पनायाः प्राग्रूपं दृश्यते। किन्तु मूर्तरूपेण प्रथमतया रचितः निरुक्तग्रन्थः यास्कप्रणीत एव। यास्काचार्यः क्रिस्तोः पूर्वं अष्टमे शतके ग्रन्थमिमं व्यरचयदिति केषाञ्चन विदुषामभिप्रायः। वैदिकशब्दानाम् अर्थनिर्णयः एव यास्कनिरुक्तस्य प्रतिपाद्यः। निघण्डुः इति प्रख्यातस्य वैदिकशब्दकोशस्य व्याख्यानरूपेण ग्रन्थोऽयं विरचितः। ग्रन्थेऽस्मिन् यथावसरं निर्वचनविधिं च समग्रतया विवृणोत्याचार्यः। नैघण्डुककाण्डः, नैगमकाण्डः, दैवताकाण्डः इति त्रयोऽध्यायाः अत्र वर्तन्ते।

वर्णागमः, वर्णविपर्ययः, वर्णविकारः, वर्णनाशः, धातोः अर्थयोगः चेति निरुक्तं पञ्चविधं भवति। अर्थप्राधान्यं पुरस्कृत्य निर्वचनं कर्तव्यमिति निरुक्तकारस्याभिमतः। यथा-

**आचार्यः** -आचारं ग्राहयति। अथवा आचारम् उपदिशति।

**आतपत्रम्** -आतपात् त्रायते ।

**वस्त्रम्** - वपुः त्रायते इति वपुस्त्रम्। (अत्र पुकारस्य लोपेन वस्त्रम् इति रूपसिद्धिः।)

**पारिजातः** - वारिणि जातः वारिजातः। (अत्र वकारस्य स्थाने पकारस्य वर्णविपर्ययेण पारिजातः।)

**पुराणम्** - पुरा नवम् -पुराणवम्। (अत्र वकारलोपेन पुराणम् इति रूपसिद्धिः।)

एतादृशरीत्या वर्णानां संयोगेन, विपरिणामेन, लोपेन, धात्वर्थानुसारं च शब्दाः निर्वक्तुं शक्यन्ते इत्यस्ति निरुक्तसिद्धान्तः। यास्काचार्यस्य निर्वचनविधयः आधुनिकभाषाशास्त्रकारैरपि अङ्गीकृताः समादृताश्च।।

**वेदाङ्गानि**

छन्दः पादौ तु वेदस्य
हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुः
निरुक्तं श्रोत्रमुच्यते।।

शिक्षा घ्राणं तु वेदस्य
मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव
ब्रह्मलोके महीयते।।

**निरुक्तभेदाः**

वर्णागमो वर्णविपर्ययश्च
द्वौचापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योगः
तदुच्यते पञ्चविधं निरुक्तम्।।

**हृदयपदनिरुक्तिः।**

हृ -इत्येकमक्षरम् अभिहरति..,
द- इत्येकमक्षरं ददाति..,
य- इत्येकमक्षरं एति...।
**(शतपथब्राह्मणम् १४-८-४-१)**
अशुद्धरक्तस्य अपहरणम्, शुद्धरक्तस्य प्रदानम्, सर्वत्र तस्य यापनम् इत्येदतस्ति हृदयस्य धर्म इति अनेन निर्वचनेन व्यनक्ति आचार्यः।

## आयुर्वेदः

आयुर्विज्ञानशास्त्रमेव आयुर्वेदपदेन व्यवह्रियते। उपवेदेष्वन्यतमः आयुर्वेदः अथर्ववेदस्य उपवेदः इति कथ्यते चरकसुश्रुतादिभिराचार्यैः । रोगकारणम्, लक्षणम्, चिकित्सा इति विषयत्रयमेव आयुर्वेदशास्त्रस्य प्रमुखप्रतिपाद्यम्। परम्पराप्राप्तां चिकित्सारीतिं क्रोडीकृत्य चरकाचार्येण प्रथमतया चरकसंहिता विरचिता। सूत्रस्थानम्, निदानस्थानम्, कल्पस्थानम्, विमानस्थानमितिरीत्या अत्र विषयविभजनं करोत्याचार्यः। तस्मात्परं सुश्रुतः शस्त्रक्रियारीतिमपि विवृण्वन् संहितामेकामलिखत्। सा सुश्रुतसंहिता इति प्रसिद्धा च। तयोरनन्तरम् वाग्भटः पूर्वाणामभिमतं कालानुकूलं संस्कृत्य अष्टाङ्गरूपेण विभज्य अष्टाङ्गहृदयं नाम ग्रन्थं प्रणिनाय। न केवलं चिकित्साविधयः किन्तु द्रव्यगुणविज्ञानादींश्च आयुर्वेदग्रन्थेषु विवृणोति। माधव-भेलादयश्चाचार्याः विषयवैविध्येन ग्रन्थान् विरच्य अस्याः शास्त्रशाखायाः पुष्टिमकुर्वन्।

## वास्तुशास्त्रम्

वसन्ति जनाः यत्र इति वास्तु। तदधिकृत्य यस्मिन् शास्त्रे विवृणोति तद् वास्तुशास्त्रम् इति कथ्यते। वास्तुशास्त्रचर्चाः वेदेषु बहुत्र वर्तन्ते। वास्तुविद्यायाः आधाररूपः स्थापत्यवेदः अथर्ववेदस्य उपवेदः इति गण्यते। मयमतम् , मानसारम्, समराङ्गणसूत्रसारम् इत्यादयः वास्तुशास्त्रप्रतिपादकाः ग्रन्थाः प्रसिद्धाः। गृहनिर्माणविधिम् अधिकृत्य श्रीमङ्गलं नीलकण्ठन् मूस्सत् महाशयेन विरचिता मनुष्यालयचन्द्रिका केरलीयवास्तुशास्त्रग्रन्थेषु प्रसिद्धास्ति। भूमिलक्षणम्, परिस्थितिविचारम् इत्यादीनि च ग्रन्थेऽस्मिन् यथावसरं विवृणोति। अन्यैरपि आचार्यैः कालानुसारं परिष्कृता भारतीयवास्तुविद्या परिस्थितेरनुकूलाम् आवासव्यवस्थामाविष्कर्तुं सर्वथा उपकरोति।।

### आयुर्वेदस्य उपवेदत्वम्।

कैश्चित् आयुर्वेदः ऋग्वेदस्य उपवेदः इति मन्यते। अन्ये अथर्ववेदस्येति च। सुश्रुतः एवं वक्ति।

“इह खलु आयुर्वेदं नामोपाङ्गमथर्ववेदस्यानुत्पाद्यैव प्रजाः श्लोकशतसहस्रमध्यायसहस्रं च कृतवान् स्वयंभूः ततोऽल्पायुस्वल्पमेधस्त्वं चालोक्य नराणां भूयोऽष्टधा प्रणीतवान्”।। (सुश्रुतसंहिता १-६)

### आयुर्वेदस्य अष्टाङ्गानि

कायचिकित्सा, कौमारभृत्यम्, ग्रहचिकित्सा, शालाक्यतन्त्रम्, शल्यतन्त्रम्, अगदतन्त्रम्, रसायन चिकित्सा, वाजीकरणम् इति आयुर्वेदस्य अष्टाङ्गानि कल्पितानि वाग्भटाचार्येण। तेषु प्रथमषट्कं आतुरवृत्तम् इति अन्तिमद्वयं स्वस्थवृत्तम् इति च प्रसिद्धम्। चरकाचार्यस्तु सूत्रस्थानम्, निदानस्थानम्, विमानस्थानम्, शरीरस्थानम्,इन्द्रियस्थानम्, चिकित्सास्थानम्, कल्पस्थानम्, सिद्धिस्थानम् इति क्रमेण अष्टधा विभज्य चरकसंहितां प्रणीतवान्।

## पदच्छेदः

| | | |
|---|---|---|
| तन्निरुक्तशास्त्रम् | - | तत् + निरुक्तशास्त्रम् |
| मुख्यो विषयः | - | मुख्यः + विषयः |
| ग्रन्थमिमम् | - | ग्रन्थम् + इमम् |
| इत्यस्ति | - | इति + अस्ति |
| समादृताश्च | - | समादृताः + च |
| तयोरनन्तरम् | - | तयोः + अनन्तरम् |
| विरचितेऽस्मिन् | - | विरचिते + अस्मिन् |
| त्रयोऽध्यायः | - | त्रयः + अध्यायः |
| चेति | - | च + इति |
| निरुक्तकारस्याभिमतः | - | निरुक्तकारस्य +अभिमतः |
| आधुनिकभाषाशास्त्रकारैरपि | - | आधुनिकभाषाशास्त्रकारैः + अपि |
| उपवेदेष्वन्यतमः | - | उपवेदेषु +अन्यतमः |
| करोत्याचार्यः | - | करोति +आचार्यः |
| भेलादयश्चाचार्याः | - | भेलादयः +च +आचार्यः |
| अन्यैरपि | - | अन्यैः+ अपि |
| परिस्थितेरनुकूलाम् | - | परिस्थितेः + अनुकूलाम्। |

## पठनप्रवर्तनम्

**केनचिदाचार्येण सह शास्त्रविषयमधिकृत्य अभिमुखभाषणं कृत्वा लघुटिप्पणीं लिखतु।** (निर्दिष्टाभ्यासः)

श्रद्धेयांशाः

१) प्रश्नवाचकशब्दानामुचितोपयोगः।

२) आशयव्यक्तता।

३) भाषाशुद्धिः

**विविधशास्त्रग्रन्थानां ग्रन्थकाराणां नामानि विविच्य सम्पुटं निर्मातु।**

श्रद्धेयांशौ

१) विषयवैविध्यम्।

२) समग्रता।

यस्य पदस्य निर्वचनम् इति विज्ञाय कोष्ठतः अनुयोज्यं पदं चित्वा पट्टिकां पूरयतु।

| | | | |
|---|---|---|---|
| नारदः | पङ्कजम् | आचार्यः | शाखा |
| पादपः | पायसम् | तुरगः | केशः |
| इतिहासः | हिमवान् | औन्नत्यम् | ऐश्वर्यम् |

आचारं ग्राहयति ..........................................।

नारं (यथार्थज्ञानम्) ददाति ..........................................।

पयसा संस्कृतम् ..........................................।

इति इह आस ..........................................।

के (शीर्षे) शेते ..........................................।

हिमम् अस्ति अस्मिन् ..........................................।

ईश्वरस्य भावः ..........................................।

पङ्के जातम् ..........................................।

तुरेण (वेगेन) गच्छति ..........................................।

उन्नतस्य भावः ..........................................।

पादेन पिबति ..........................................।

खे (आकाशे) शेते .......................................।

**प्रवर्तनम् ४**

**सूचनानुसारं लघुविवरणं लिखतु।**

(सूचनाः - आयुर्वेदः - आचार्यः - वाग्भटः - अष्टाङ्गानि -
चिकित्सारीतयः - कालिकप्रसक्तिः)

श्रद्धेयांशाः -

१) सूचनानां परिपूर्णतया स्वीकरणम्।

२) आशयपूर्णता।

३) भाषाशुद्धिः

**कोशः**

चिकित्सा -चिकित्सा रुक्प्रतिक्रिया ।
वास्तु - धिष्ण्यमोको निवसनं स्थानं वास्तु निवेशनम्।

## अभ्यासपत्रिका -३

१) उदाहरणानुसारं विग्रहवाक्यानि लिखतु।

उदा -

सपल्लवम् - पल्लवेन सह वर्तते।
सबहुमानम् - ........................।
सादरम् - ........................।

२) श्लोकं पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखतु।

**मधु द्विरेफः कुसुमैकपात्रे**
**पपौ प्रियां स्वामनुवर्तमानः।**
**शृङ्गेण च स्पर्शनिमीलिताक्षीं**
**मृगीमकण्डूयत कृष्णसारः।।**

१) भ्रमरः इत्यर्थकं पदं किम्?

२) कः मृगीमकण्डूयत?

३) श्लोके प्रयुक्तं शानजन्तं पदं किम्?

३) यथोचितं योजयत।

आतपत्रम् - अलं करोति अनेन।
पुराणम् - वपुः त्रायते।
आचार्यः - पुरा नवम्।
वस्त्रं - आतपात् त्रायते।
अलङ्कारः - आचारं ग्राहयति।

४)वसन्तागमः इति पाठस्य आशयः सूचनानुसारं स्ववाक्यैः लिखतु।

***सूचना -***

हरस्याश्रमः - चूतप्रवालोत्पत्तिः -चराचराणां परस्परप्रेमा- कर्णिकारकुसुमम्- कुसुमपात्रे मधुपानम्- निष्कम्पवृक्षम्।

५) वेदानां वेदाङ्गानां विविच्य पट्टिकां रचयतु।

| | | | |
|---|---|---|---|
| सामः | कल्पम् | छन्दः | ऋक् |
| ज्योतिषम् | निरुक्तम् | अथर्वः | शिक्षा |

## शब्दकोशः।

| | | | | |
|---|---|---|---|---|
| अनिलः | वायुः | കാറ്റ് | Wind | ಗಾಳಿ |
| अभिमतः | अभिप्रायः | അഭിപ്രായം | Opinion | ಅಭಿಪ್ರಾಯ |
| असूत | प्रासूत | പ്രസവിച്ചു | Delivered(given birth) | ಪ್ರಸವಿಸು |
| आचार्यः | गुरुः | ആചാര്യൻ | Teacher | ಗುರುಗಳು |
| आतपत्रम् | छत्रम् | കുട | Umbrella | ಕೊಡೆ |
| आशिञ्जित- | शब्दायमानः | കിലുങ്ങുന്ന | Gingling | |
| नूपुरः | नूपुरः | ചിലങ്ക | anklet | ಗೆಜ್ಜೆ |
| करेणुः | करिणी | പിടിയാന | She elephant | ಹೆಣ್ಣಾನೆ |

| | | | | |
|---|---|---|---|---|
| कर्णिकारम् | कर्णिकारकुसुमम् | കൊന്നപ്പൂ | The flower of kurnikara tree | ಕೊನ್ನೆ ಹೂ |
| कृष्णसारः | कृष्णमृगः | കൃഷ്ണ മൃഗം | Black deer | ಕೃಷ್ಣಮೃಗ |
| गण्डूषजलम् | शुण्डायां धृतं जलम् | തുമ്പിക്കൈയിൽ നിർത്തിയ ജലം | Water held in trunk | ಸೊಂಡಿಲಲ್ಲಿರುವ ನೀರು |
| चारुपत्रम् | मनोहरपत्रम् | മനോഹരമായ ഇല | Beautiful leaf | ಮನೋಹರವಾದ ಎಲೆ |
| द्विरेफः | भ्रमरः | വണ്ട് | Large black bee/beetle | ಭ್ರಮರ/ದುಂಬಿ |
| नन्दी | नन्दिकेश्वरः | നന്ദികേശ്വരൻ | Servant chief of Lord Shiva | ನಂದಿಕೇಶ್ವರ |
| नवचूतबाणः | नूतनः चूतबाणः | പുതിയ ചൂതമാകുന്ന ബാണം | The arrows made of new mango flowers | ಹೊಸದಾದ ಬಾಣ |
| नामाक्षराणि | नाम्नः अक्षराणि | പേരിന്റെ അക്ഷരങ്ങൾ | Letters in name | ಹೆಸರಿನ ಅಕ್ಷರಗಳು |
| निर्गन्धता | सुगन्धरहितभावः | സുഗന്ധമില്ലായ്മ | Not arromic | ಸುವಾಸನೆಯಿಲ್ಲದ |
| पराङ्मुखी | तात्पर्यशून्या | വിമുഖത ഉണ്ടാക്കുന്നത് | Avarted | ನಿರಾಸಕ್ತಿದಾಯಕ ಮಾಡುವುದು |
| प्रभवस्थानम् | उत्पत्तिस्थानम् | ഉത്പത്തി സ്ഥാനം | Source | ಮೂಲ ಸ್ಥಾನ |
| प्रवालोद्गमः | पल्लवोत्पत्तिः | തളിരുകളുടെ ആവിർഭാവം | sporting of leaflets | ಚಿಗುರುಗಳ ಆವಿರ್ಭಾವ |
| बिसः | मृणालः | താമര വലയം | Lotus straw | ತಾವರೆ ದಂಡು |
| मधु | वसन्तकालः | വസന്തകാലം | Spring Season | ವಸಂತಕಾಲ |
| मर्मपत्रमोक्षाः | मर्मरशब्देन पत्रविमुक्तयः | | Falling of leafs with murmaring sound | ಶಬ್ದವನ್ನು ಹೊರಡಿಸುದು |
| रजः कणः | परागरेणुः | പൂമ്പൊടി | Pollen | ಹೂವಿನ ಸ್ಫುರಣಗಳು |

| | | | | |
|---|---|---|---|---|
| रथाङ्गनाम | चक्रवाकः | ചക്രവാക പക്ഷി | A poetic bird called chakravaka | ಚಕ್ರವಾಕ ಹಕ್ಕಿ |
| वनस्थली | वनप्रदेशः | കാട്ടു പ്രദേശങ്ങൾ | Forest area | ಅರಣ್ಯ ಪ್ರದೇಶ |
| वर्णप्रकर्षः | वर्णानां प्रकर्षः | നിറപകിട്ട് | Collage | ವರ್ಣಕಾಂತಿ |
| वस्त्रम् | वसनम् | വസ്ത്രം | Dress | ಬಟ್ಟೆ |
| वास्तुः | वेश्मभूः | വാസസ്ഥാനം | Idea regarding the resident land | ವಾಸ್ತು |
| विघ्नित दृष्टिपातः | विरुद्धदर्शकः | തടയപ്പെട്ട കാഴ്ചയോട് കൂടിയവൻ | | ನಿಷೇದಿಸಿದ ದೃಶ್ಯಗಳಿಂದ ಕೂಡಿದ |
| विप्लवात्मिका | प्रचलनात्मिका | ചലനങ്ങൾ ഉണ്ടാക്കിയ | Progressive change | ಚಲನಗಳನ್ನು ಉಂಡುಮಾಡಿದ |
| विश्वस्रष्टा | ब्रह्मा | ബ്രഹ്മാവ് | Lord of creation | ಬ್ರಹ್ಮದೇವರು |
| शृङ्खम् | विषाणम् | കൊമ്പ് | Horn | ಜಿಂಕೆ ಕೊಂಬು |
| स्कन्धः | वृक्षस्य काण्डम् | വൃക്ഷത്തിന്റെ കാണ്ഡം | Trunk of tree | ಮರದ ಕಾಂಡ |
| स्पर्शनिमीलिताक्षी | स्पर्शनसुखेन निमीलितनयना | സ്പർശനസുഖത്താൽ കണ്ണടച്ചു നിൽക്കുന്നവൾ | Having clossed eyes due to soft touch (Feminine gender) | ಸ್ಪರ್ಶ ಸುಖದಿಂದ ಕಣ್ಣು ಮುಚ್ಚಿದವಳು |
| सामग्र्यविधिः | पूर्णताविधौ | പൂർണ്ണത കൈവരുത്തൽ | Creating totality | ಪೂರ್ಣಗೊಳ್ಳು |

# किमधिगतम्

**निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√ ) क्रियताम्**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १ | | | | | |
| २ | | | | | |
| ३ | | | | | |
| ४ | | | | | |
| ५ | | | | | |
| ६ | | | | | |

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।



### आमुखम्

संस्कृतकुसुमेषु परागभूताः भवन्ति संस्कृतचित्ताः महात्मानः। तेषां चरित्रवर्णनमपि तत्समानं भवति। परागनामके अस्मिन्नेकके मूषिकवंशनामकात् चरित्रकाव्यात् पञ्चश्लोकानाकलय्य **वंशानुचरितमि**ति पाठः श्रीशङ्कराचार्यः, श्रीनारायणगुरुदेवः ,चट्टम्पिस्वामीत्येतेषां महात्मनां लघुचरितरूपः **आत्मबोधो विमुक्तये** इति पाठश्च समायोजितः।



एककम् ४

# परागः

**पठनाधिगमाः**

- केरलीयानि चरित्रकाव्यानि परिचाय्य टिप्पणीं लिखति।
- खण्डकाव्य-महाकाव्य-चरित्रकाव्य-स्तोत्रकाव्यानां पट्टिकां रचयति।
- केरलदेशे वर्तमानानां पुरातनदेशानाम् आधुनिकनामानि विविच्य ज्ञात्वा लिखति।
- सूचनानामाधारेण उपन्यासं रचयति।
- केरलीयान् नवोत्थाननायकानधिकृत्य टिप्पणीं लिखति।
- क्त्वान्त-ल्यबन्त-तुमुन्नन्तानाम् अव्ययानां पट्टिकाकरणम् ।

**प्रवेशकः - स्वदेशस्य चरित्रप्राधान्यमधिकृत्य चर्चां करोतु।**

पाठः ९

# वंशानुचरितम्



## आमुखम्

केरलीयचरित्रकाव्येषु अन्यतमं भवति **मूषिकवंशम्**। अतुलकविना विरचितेऽस्मिन् काव्ये उत्तरकेरलेषु वर्तमानस्य एषिमलानामकदेशस्य ऐतिहासिककथाः उपवर्णिताः । घोरे संग्रामे मृतिं प्राप्तस्य माहिष्मतीराजस्य आसन्नप्रसवा पत्नी कुलगुरोः साहाय्येन कोलमारुह्य एषिमला नाम गिरिं प्राप। मूषिकवृक्षैः निबिडे पर्वते गुहायाम् उषित्वा सा बालकमेकं प्रासूत। कुमारं तं परशुराम अस्य देशस्य राजानमकरोत्। स एव मूषिकवंशस्य स्थापकः रामघटमूषिकः इति पश्चात् प्रख्यातः। मूषिकवृक्षैः (शिरीषैः) समावृतो देशः अस्य आस्थानम् इत्यनेन वंशस्यास्य नाम मूषिकवंशम् इति सञ्जातम्।

पञ्चदशसर्गात्मकस्य मूषिकवंशकाव्यस्य त्रयोदशसर्गात् उद्धृताः केचन श्लोकाः पाठभागे दत्ताः। द्वित्राणां मूषिकवंशभूपानां चरितमेवात्र सूचितम्।

जयमानी नाम राज्ञः भागिनेयः वलभः मूषिकदेशस्य राजा बभूव।

**अथ तस्य विभोरनन्तरो**
**विजयी सद्गुणरत्नसागरः।**
**बलभद्रसमानविग्रहो**
**वलभो नाम बभूव पार्थिवः ।। १**

**पदच्छेदः**

विभोरनन्तरो विजयी - विभोः + अनन्तरः + विजयी ।

वलभो नाम - वलभः + नाम।

**विग्रहः**

सद्गुणरत्नसागरः - सद्गुणाः एव रत्नानि सद्गुणरत्नानि, तेषां सागरः ।

बलभद्रसमानविग्रहः - बलभद्रेण समानः विग्रहः यस्य सः।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| अथ | अनन्तरम् |
| तस्य विभोः | तस्य राज्ञः (जयमानी इति राज्ञः) |
| अनन्तरः | अनन्तरजातः |
| विजयी | प्राप्तविजयः |
| बलभद्रसमानविग्रहः | बलरामस्य समानरूपी |
| सद्गुणरत्नसागरः | सद्गुणसम्पन्नः |
| वलभो नाम | वलभ इति प्रसिद्धः |
| पार्थिवः | भूपतिः |
| बभूव | अभवत्। |

क्रियारूपाणि

उपादधुः - उप, आङ् -उपसर्गपूर्वक (डु)धाञ् -धारणपोषणयोः परस्मैपदी लिट् प्र.पु.ब.वचनम्।

| | | |
|---|---|---|
| दधौ | दधतुः | दधुः |
| दधिथ/दधाथ | दधथुः | दध |
| दधौ | दधिव | दधिम |

व्यधित -वि उपसर्गपूर्वक (डु)धाञ् -धारणपोषणयोः आत्मनेपदी लुङ् प्र.पु.ए.वचनम्।

| | | |
|---|---|---|
| अधित | अधिषाताम् | अधिषत |
| अधिथाः | अधिषाथाम् | अधिढ्वम् |
| अधिषि | अधिष्वहि | अधिष्महि।। |

**भावार्थः**

मूषिकवंशभूपतिषु अन्यतमस्य जयमानिनः अनन्तरं तस्य भागिनेयः बलभद्रसदृशः विक्रमशाली सकलप्रतापगुणवान् बलभो नाम राजा अभवत्।

राज्ञः वलभस्य धीरतामेवं वर्णयति।

**रणदर्पविकस्वरेष्वलं**
**मुखरा यस्य मुहुः शिलीमुखाः।**
**वदनाम्बुरुहेषु विद्विषां**
**पतिताः प्राणमधून्युपादधुः ।। २**

**पदच्छेदः**

रणदर्पविकस्वरेष्वलम् - रणदर्पविकस्वरेषु + अलम्।

प्राणमधून्युपादधुः - प्राणमधूनि + उपादधुः।

**विग्रहः**

रणदर्पविकस्वरेषु - रणेषु दर्पः रणदर्पः तेन विकस्वरः रणदर्पविकस्वरः तेषु ।

प्राणमधूनि - प्राणाः एव मधु प्राणमधु तानि।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| यस्य | वलभस्य |
| मुखराः | मुखरिताः |
| शिलीमुखाः | बाणाः/ भ्रमराः |
| रणदर्पविकस्वरेषु | युद्धमदेन विकासोन्मुखेषु |
| विद्विषाम् | शत्रूणाम् |
| वदनाम्बुरुहेषु | मुखपद्मेषु |
| पतिताः(सन्तः) | निपतिताः (सन्तः) |
| मुहुः | पुनः |
| प्राणमधूनि | प्राणमकरन्दानि |
| उपादधुः | अपिबन् |
| अलम् | पर्याप्तम्। |

**भावार्थः**

युद्धावसरे वलभप्रयुक्ताः शब्दमुखरिताः तीक्ष्णबाणाः भ्रमराः इव युद्धदर्पेण विकसितोन्मुखेभ्यो शत्रुमुखपङ्कजेभ्यो प्राणमधूनि अपिबन् ।

*वलभः नृपरामम् (रिपुराममिति नामान्तरम्) भटस्थलीदेशस्य राजानमकरोत्।*

**अपनुद्य ततस्ततो रिपून्**

**स्वपरित्राणपरायणोद्यमान्।**

**नृपतिर्निजवंशकेतवे**

**नृपरामाय ददौ भटस्थलीम्।। ३**

**पदच्छेदः**

| | | |
|---|---|---|
| ततस्ततो रिपून् | - | ततः + ततः + रिपून्। |
| नृपतिर्निजवंशकेतवे | - | नृपतिः + निजवंशकेतवे। |

**विग्रहः**

| | | |
|---|---|---|
| स्वपरित्राणपरायणोद्यमान् | - | स्वस्य परित्राणं स्वपरित्राणं, तदर्थं परायणः स्वपरित्राणपरायणः, तस्मिन् उद्यमः यस्य सः स्वपरित्राणपरायणोद्यमः तान्। |
| निजवंशकेतवे | - | निजवंशस्य केतुः निजवंशकेतुः , तस्मै। |
| नृपतिः | - | नृणां पतिः, नृपतिः। |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| नृपतिः | नरपतिः (वलभः इति यावत्) |
| स्वपरित्राणपरायणोद्यमान् | स्वप्राणरक्षार्थं पलायमानान् |
| रिपून् | शत्रून् |
| ततस्ततः | तत्र तत्र |
| अपनुद्य | दूरीकृत्य |
| निजवंशकेतवे | स्ववंशालङ्कारभूताय |
| नृपरामाय | रामो नाम राज्ञे |
| भटस्थलीम् | भटस्थली नाम देशम् |
| ददौ | ददाति स्म। |

**भावार्थः**

अथ स्वप्राणरक्षार्थं पलायमानान् शत्रून् दूरीकृत्य वलभो नाम राजा स्ववंशालङ्कारभूताय नृपरामाय 'भटस्थली' नाम देशं प्रददौ ।

**कोशः**

रिपुः - रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः । इत्यमरः।

*वलभस्यानुजः कुन्दवर्मा नारायणपुरं नाम मन्दिरं नवीकृतवान्।*

**अभिरक्ष्य भुवं चिराय यो**

**विभवैर्न्यायवशादुपार्जितैः।**

**व्यधित प्रथितं मुरद्विषो**

**भुवि नारायणपूर्वकं पुरम्।। ४**

**पदच्छेदः**

यो विभवैर्न्यायवशादुपार्जितैः - यः + विभवैः + न्यायवशात् + उपार्जितैः।

मुरद्विषो भुवि - मुरद्विषः + भुवि।

**विग्रहः**

मुरद्विषः - मुरं द्वेष्टि इति मुरद्विट् , तस्य ।

| **अन्वयः** | **अन्वयार्थः** |
| --- | --- |
| यः | वलभस्यानुजः (कुन्दवर्मा) |
| चिराय | चिरकालम् |
| न्यायवशादुपार्जितैः | न्यायकर्मभिः समार्जितैः |
| विभवैः | धनैः |
| भुवम् | देशम् |
| अभिरक्ष्य | संरक्ष्य |
| भुवि | तस्मिन् देशे |
| प्रथितम् | प्रसिद्धम् |
| मुरद्विषः | विष्णोः |
| नारायणपूर्वकं पुरम् | नारयणनामकं मन्दिरम् |
| व्यधित | नवमकरोत्। |

**भावार्थः**

कुन्दवर्मा नाम राजा चिरकालं सत्कर्मभिः आर्जितैः धनसम्पद्भिः देशभरणं सम्यक् कृतवान् । सः तस्मिन् देशे नारायणपुरनामकं विष्णुमन्दिरं नवीकृतवान् ।

*कुन्दवर्मणः अनन्तरं तस्य भागिनेयः पालकः देशेऽस्मिन् राजा बभूव।*

**अथ तत्र नृपे यशोनिधौ**
**स्मरणीयां गतिमभ्युपेयुषि ।**
**स्वसुरस्य सुतः स्मराकृतिः**
**पृथिवीं पालयति स्म पालकः ।। ५**

**पदच्छेदः**

स्वसुरस्य - स्वसुः + अस्य ।

**विग्रहः**

यशोनिधौ - यशसां निधिः यशोनिधिः, तस्मिन् ।
स्मराकृतिः - स्मरस्य आकृतिः इव आकृतिः यस्य सः

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| अथ | अनन्तरम् |
| तत्र | तस्मिन् देशे |
| यशोनिधौ | सुप्रशस्ते (सुकीर्तिसम्पन्ने) |
| नृपे | राजनि (कुन्दवर्मा नाम राजनि) |
| स्मरणीयां गतिम् | नामावशेषामवस्थाम् (मृतिम् ) |
| अभ्युपेयुषि (सति) | सम्प्राप्ते (सति) |
| अस्य | एतस्य (राज्ञः कुन्दवर्मणः) |
| स्वसुः | सोदर्याः |
| स्मराकृतिः | कामदेवसदृशः |
| सुतः | पुत्रः (भागिनेयः) |
| पालकः | पालको नाम राजा |
| पृथिवीम् | भूमिम् (मूषिकदेशम्) |
| पालयति स्म | अपालयत्। |

**भावार्थः**

प्रशस्तस्य राज्ञः कुन्दवर्मणः मरणानन्तरं तस्य भागिनेयः पालकः नाम राजा मूषिकदेशं पालयति स्म

## पठनप्रवर्तनानि

**श्लोकान् सतालमालपतु।**

*श्रद्धेयाः अंशाः*

*१) उचिततालः।*

*२) भावात्मकता।*

*३) उच्चारणशुद्धिः।*

**श्लोकानामाशयं सङ्गृह्य वदतु लिखतु च।**

*श्रद्धेयाः अंशाः*

*१) आशयपूर्तिः।*

*२) भाषाशुद्धिः।*

*३) औचित्यम्।*

**कानिचित् केरलीयचरित्रकाव्यानि अधिकृत्य लघुटिप्पणीं लिखतु।**

*श्रद्धेयाः अंशाः*

*१) आशयव्यक्तता।*

*२) भाषाशुद्धिः।*

*३) औचित्यम्।*

**केरले विद्यमानानां देशानां पौराणिकनामानि अत्र दीयन्ते। तेषां इदानीन्तननामानि लिखित्वा पट्टिकां पूरयतु।**

| पौराणिकनामानि | इदानीन्तननामानि |
|---|---|
| कोटिलिङ्गपुरम् | |
| गोश्रीपुरम् | |
| सह्यामलकम् | |
| कुक्कुटक्रोडपुरम् | |
| स्यानन्दूरपुरम् | |
| तृश्शिवपुरम् | |

अधोनिर्दिष्टाः ग्रन्थाः कस्मिन् विभागे अन्तर्भवन्ति इति विविच्य पट्टिकां पूरयतु।

आङ्गलसाम्राज्यम् कुमारसम्भवम् मूषिकवंशम् किरातार्जुनीयम्

चण्डीशतकम् नैषधीयचरितम् केरलोदयः नारायणीयम्

विशाखविजयम् मूकपञ्चशति शिशुपालवधम् नवभारतम्

| महाकाव्यम् | चरित्रकाव्यम् | स्तोत्रकाव्यम् |
|---|---|---|
| | | |
| | | |

पाठः १०

# आत्मबोधो विमुक्तये



केरलीयसामाजिकस्तरः इतरराज्यापेक्षया अत्युन्नतं विराजते। केरलेषु विद्यमानाः अनेके सामाजिकपरिष्कर्तारः एव अस्य निदानम्। इतरप्रदेशेषु इदानीमपि विद्यमानानि सामाजिकासमत्वानि केरलेषु तेषां परिष्कर्तॄणां अश्रान्तपरिश्रमेणैव अस्तंगतानि। अत्र शङ्कराचार्यादयोबहवः महात्मानः दार्शनिकाः अवर्तन्त । तेषु केषाञ्चन महात्मनां जीवनमधिकृत्य एकैका घटना अत्र प्रतिपाद्यते।

श्री शङ्कराचार्यस्य जन्म कालट्यां पूर्णा नद्याः तीरे क्रस्त्वब्दे ७८८ तमे संवत्सरे अभूत्। पिता शिवगुरुः माता आर्याम्बा च। अद्वैतसिद्धान्त प्रघोषकोयं तत्प्रचारणाय चत्वारि मठानि स्थापयामास। सौन्दर्यलहरी, विवेकचूडामणिः, दशश्लोकी इत्यादीनां स्वतन्त्रकृतीनां ब्रह्मसूत्र-दशोपनिषत्-भगवद्गीताभाष्याणां च कर्तृत्वेन प्रसिद्धोऽयं महात्मा द्वित्रिंशत् तमे वयसि यशशरीरोऽभवत्।

## श्रीशङ्कराचार्यः (७८८-८२०)

सन्यासदीक्षार्थं प्रस्थानावसरे मातुः अन्तिमकाले अवश्यम् आगमिष्यामिति दत्तवचनमनुपालयन् दिव्यदृष्टौ मातुः देहवियोगावस्थां दृष्ट्वा शङ्कराचार्यः तामुपगतः। प्रणामानन्तरं मातुः निर्देशानुसारं सद्य एव सः शिवभुजङ्गस्तोत्रं तथा विष्णुभुजङ्गस्तोत्रं च कृत्वा आललाप। विगतमरणशङ्का सा पुनः बाल्ये तस्य इष्टगीतं गोविन्दाष्टकम् श्रोतुम् ऐच्छन् । मातुः देहवियोगानन्तरं समीपस्थाः जनाः तस्य साहाय्यं कर्तुं न सन्नद्धाः। मातुः मृतदेहसंस्कारादिकं पूर्णानद्याः तीरे स्वयमेव कृत्वा सः मातृपञ्चकं इति गीतमकरोत् च । तद्यथा -

आस्तां तावदियं प्रसूतिसमये दूर्वारशूलव्यथा
नैरुच्यं तनुशोषणं मलमयी शय्या च सांवत्सरी।
एकस्यापि न गर्भभारभरणक्लेशस्य यस्य क्षमो
दातुं निष्कृतिमुन्नतोऽपि तनयस्तस्यै जनन्यै नमः।।

एवम् आसेतुहिमाचलम् अटन् शङ्कराचार्यः संस्कृतभाषाया एव तस्य अभिमतान् प्रचारयामास।



श्रीचट्टम्पिस्वामी १८५३ तमे वर्षे अनन्तपुर्यां कोल्लूर् नामके ग्रामे जनिमलभत। पिता वासुदेवशर्मा माता नङ्ङम्मपिल्ला च । कुञ्चन् इत्यभिधोऽयं पाठशालायां छात्रनेतृत्वं निरवहत्। अतः अयं चट्टम्पीति आहूतोऽभवत्। समाजपरिष्कर्तृत्वेन,नवोत्थाननायकत्वेन, आत्मीयाचार्यत्वेन चास्य स्थानं प्रसिद्धमेव। १९२४ तमे संवत्सरे पन्मनायां अस्य देहवियोगोऽभूत्। प्राचीनमलयालं, वेदाधिकारनिरूपणं, आदिभाषा, जीवकारुण्यनिरूपणमित्यादयः अस्य प्रधानकृतयः भवन्ति।

## श्रीचट्टम्पिस्वामी (१८५३-१९२४)

चट्टम्पिस्वामिनः समभावना प्रसिद्धा एव। तेन महात्मना साकं ये ये आसन् तेषां कार्येषु सः नितरां श्रद्धालुरासीत्। तेषामभिमानक्षतं कदापि न संभवेत् इति विषये सदा सः बद्धश्रद्धश्चासीत् । तादृशी एका घटना अत्र सूच्यते। एकदा एकस्मिन् गृहे विश्रमावसरे परवूर् न्यायाधीशः आण्डिपिल्ला महाभागः स्वामिनं स्वगृहे सत्कर्तुं निश्चित्याहूतवान्। स्वामी तु सुहृदा साकं न्यायाधीशभवनं सम्प्राप। न्यायाधीशः भार्यया समं स्वामिनं स्वीकृत्य गृहान्तर्भागं प्रवेष्टुमाहूतवान्। सन्दिहानं सुहृदमपि प्रवेष्टुं स्वामी निर्बन्धितवान्। भोजनावसरेऽपि सुहृदः स्थानं प्रकोष्ठात् बहिरिति ज्ञात्वा स्वस्यापि स्थानं तत्रैव अस्तु इति तात्पर्यं प्रकटयामास। स्वामिनः मनोगतं प्रत्यभिज्ञाय न्यायाधीशः तेन सार्धम् उभाभ्यामपि भोजनव्यवस्थां कृतवान्। आध्यात्मिकविषयेषु इव लौकिककार्येष्वपि समभावना कार्या इति स्वजीवनेनैव स्वामी स्वाशयं प्रचारयामास । असौ श्रीनारायणगुरुदेवस्य ज्येष्ठकल्पः सुहृदश्चासीत् ।।

श्रीनारायणगुरुदेवः
१८५६ तमे वर्षे चेम्पषन्ति ग्रामे वयल्वारं भवने माटनाशान्-कुट्टियम्मयोः अपत्यत्वेन जनिमलभत। केरले समाजपरिष्कर्तृषु नवोत्थान नायकत्वेनायं प्रशस्तः। संस्कृते कैरल्यां च बहवः कृतयः तेन रचिताः। दर्शनमाला, निर्वृतिपञ्चकम् इत्यादयः संस्कृतग्रन्थाः तेन रचिताः। १९७७ तमे वर्षे शिवगिर्यां महानुभावोऽयं समाधिं प्राप।

## श्रीनारायणगुरुदेवः (१८५६-१९२७)

श्रीनारायणगुरुदेवस्य काले समाजे सर्वेषाम् आराधनास्वातन्त्र्यं न अवर्तत। देवताराधनया विद्याभ्यासेन च समुदायोद्धारणं साध्यमिति ज्ञात्वा सः देवालयान्, विद्यालयान् च संस्थाप्य सर्वान् पठनाय प्रचोदितवान्। एकदा गुरुदेवः 'अरुविप्पुरे' एकां शिवप्रतिष्ठामकरोत्। तस्मिन्नवसरे प्रतियोगित्वेनागतानां पुरतः सः 'एतत् अस्माकं देव एव' इत्युक्तवान्। पुनः तत्र एवं लिखितवान् - 'जातिभेदं मतद्वेषं विना यत्र नराः समे, सोदरत्वेन तिष्ठन्ति मातृकास्थानमप्यदः' इति। बाल्य एव संस्कृतपठनमारभ्य स असामान्यपाटवेन भारतीयकाव्येषु, शास्त्रेषु च निष्णातः समजनि। मितेन, हितेन सारेण च सम्भाषणेन विनयेन च सर्वेषां तोषं जनयामास। एवं कालान्तरे महानुभावोऽयं योगी पण्डितः कविः आचार्य इत्यादिभिः बिरुदैः प्रथितोऽभवत्।



पदच्छेदः

| | | | | | | |
|---|---|---|---|---|---|---|
| कोऽपि | - | कः | + | अपि । | | |
| निष्कृतिमुन्नतोऽपि | - | निष्कृतिमुन्नतः | + | अपि। | | |
| तनयस्तस्यै | - | तनयः | + | तस्यै। | | |
| संस्कृतेनैव | - | संस्कृतेन | + | एव। | | |
| श्रद्धालुरासीत् | - | श्रद्धालुः | + | आसीत् । | | |
| इत्यस्मिन् | - | इति | + | अस्मिन्। | | |
| स्वस्यापि | - | स्वस्य | + | अपि । | | |
| तत्रैव | - | तत्र | + | एव। | | |
| लौकिककार्येष्वपि | - | लौकिककार्येषु | + | अपि । | | |
| स्वजीवनेनैव | - | स्वजीवनेन | + | एव। | | |
| सुहृच्चासीत् | - | सुहृत् | + | च | + | आसीत् |
| इतियुक्तवान् | - | इति | + | उक्तवान्। | | |

विग्रहः

| | | |
|---|---|---|
| न्यायाधीशः | - | न्याये अधीशः । |
| मनोगतम् | - | मनसि गतम्। |
| विगतमरणशङ्का | - | मरणे शङ्का मरणशङ्का, विगता मरणशङ्का यस्याः सा । |

**व्याकरणविशेषः**

स्वामी तु सुहृदा **साकं** न्यायाधीशभवनं संप्रप ।

"सहयुक्तेऽप्रधाने " इति सह समं साकं सार्धं इत्येतेषां योगे तृतीयाविभक्तिः।

जनन्यै **नमः** ।

"नमस्वस्तिस्वाहास्वधाऽलं वषड्योगाच्च" इति नमः शब्दस्य योगे चतुर्थी स्यात् ।

धातुपरिचयः

| | | |
|---|---|---|
| प्रचारयामास | - | प्रपूर्वक चर् धातोः आत्मनेपदी लिट् प्र. पु. ए. व। |
| सूच्यते | - | सूच् परिशून्ये कर्मणि लट् प्र. पु. ए. व। |
| अवर्तत | - | व्रत् परस्मैपदी लङ् म. पु. ब. व। |
| अदात् | - | दाञ् दाने लङ् प्र. पु. ए. व। |

## पठनप्रवर्तनम्

**सूचनानुसारं महात्मनां जीवनचरितं लिखतु।**

*सूचना -*

श्रीशङ्कराचार्यः - जीवनकालः ७८८-८२० - जन्मदेशः कालटि- बाल्ये संन्यासम्-

अद्वैतप्रचारकः -भाष्यकारः ।

श्रद्धेयाः अंशाः

जीवनचरितघटना।

सूचनानाम् उपयोगः।

भाषाशुद्धिः।

**उपन्यासस्य आशयं संगृह्य मातृभाषायां परिवर्त्य लिखतु ।**

श्रद्धेयाः अंशाः

आशयपूर्णता।

भाषाशुद्धिः

**कमपि केरलीयसामाजिकपरिष्कर्तारम् अधिकृत्य लघुटिप्पणीं लिखतु ।**

श्रद्धेयाः अंशाः

आशयपूर्णता।

संक्षिप्तता।

औचित्यम्।

**वाक्येषु योजयतु।**

अ) नितराम् , आ) अत्यधिकम् , इ) अतीव ।

श्रद्धेयाः अंशाः

आशयपूर्णता।

संक्षिप्तता।

वाक्यघटना।

**केषाञ्चन सामूह्यपरिष्कर्तॄणां छायाचित्रसहितं जीवनचरितं सञ्चित्य सम्पुटमेकं रचयतु।**

श्रद्धेयाः अंशाः

आशयपूर्णता

उचिता भाषाशैली

उचितं दत्तशेखरणम्

अधिकविस्तारः

आस्तां तावदियं......................।।

अन्वयः – प्रसूतिसमये इयं दुर्वारशूलव्यथा, नैरुच्यं, तनुशोषणं, सांवत्सरी मलमयी शय्या च आस्तां तावत्। अस्य गर्भभारभरणक्लेशस्य एकस्य अपि निष्कृतिं दातुं तनयः उन्नतः अपि न क्षमः। तस्यै जनन्यै नमः।

व्याख्या – प्रसूयते इति प्रसूति , प्रसवः तस्य समये । दुःखेन वारयितुं शक्यः दुर्वारः, दुर्वारश्च असौ शूलः च दुर्वारशूलः, तस्य व्यथा। रुच्यते इति रुचिः निर्गता रुचिः यस्याः निरुचिः, तस्याः भावः नैरुच्यम्। तनोः शोषणम् तनुशोषणम् । मलप्रचुरा मलमयी। प्राचुर्यार्थे मयट् प्रत्ययः।संवत्सरस्य इयं सांवत्सरी- संवत्सरं यावत् इत्यर्थः। एतत्सर्वं भवतु नाम। गर्भस्य भारः गर्भभारः, तस्य भरणं गर्भभारभरणम्। तेन क्लेशः तस्य निष्कृतिः-प्रायश्चित्तम् कर्तुं तनयः उन्नतः यस्य अपि न क्षमः भवति। तस्मै तादृश्यै जनन्यै नमः।

# शब्दकोशः

| | | | | |
|---|---|---|---|---|
| अभिधा | नाम | പേര് | Name | ` ಹೆಸರು |
| अभिलाषपूर्तिः | इच्छासाफल्यम् | ആഗ്രഹ സാഫല്യം | Fullfilment of desire | ಆಗ್ರಹ ಸಾಫಲ್ಯ |
| अम्भुरुहः | कमलम् | താമര | Lotus | ತಾವರೆ |
| अश्रान्तपरिश्रमः | निरन्तरपरिश्रमः | നിരന്തര പരിശ്രമം | | ನಿರಂತರ ಪ್ರಯತ್ನ |
| आत्मबोधः | ब्रह्मज्ञानम् | ബ്രഹ്മ ജ്ഞാനം | | ಬ್ರಹ್ಮಜ್ಞಾನ |
| आसन्नप्रसवा | पूर्णगर्भिणी | പൂർണ്ണ ഗർഭിണി | Pregnant lady about to deliver | ಬಸಿರು / ಗರ್ಭಿಣಿ |
| उपादधुः | अपिबत् | കുടിച്ചു | Drunk | ನೀರು ಕುಡಿತು |
| कृतितल्लजः | प्रशस्ता कृतिः | പ്രസിദ്ധമായ കൃതി | Famous compsitions | ಪ್ರಸಿದ್ಧ ಕೃತಿಗಳು |
| ज्येष्ठकल्पः | ज्येष्ठसदृशः | ജ്യേഷ്ഠതുല്യൻ | Equal to elder brother | ಹಿರಿಯಣ್ಣನಿಗೆ ಸಮಾನ |
| दिदृक्षति | द्रष्टुम् इच्छति | കാണാൻ ആഗ്രഹം | Eager to see | ನೋಡಲು ಆತುರ |
| द्विट् | शत्रुः | ശത്രു | Enemy | ವೈರಿ |
| दुर्वारशूलव्यथा | वारयितुमशक्या | തീക്ഷ്ണ വേദന | Unbearable fortuny pain | |
| निष्कृतिः | प्रतिकृतिः | കടം വീട്ടൽ | Redumption | ಬಿಡುಗಡೆ/ ಉದ್ಧಾರ |
| निष्णातः | समर्थः | സമർത്ഥൻ | Efficient | ಚತುರ |
| परित्राणनम् | रक्षणात् | രക്ഷിക്കാൻ | Inexplicable | ರಕ್ಷಣೆ |
| पार्थिवः | राजा | രാജാവ് | King | ಅರಸು |



| | | | | |
|---|---|---|---|---|
| प्रख्यातः | प्रसिद्धः | പ്രസിദ്ധൻ | Famous | ಪ್ರಖ್ಯಾತ |
| प्रतियोगित्वम् | मात्सर्यम् | മത്സരം | Competition | ಸ್ಪರ್ಧೆ |
| ब्रह्मभूयः | ब्रह्मत्वम् | ദിവംഗതൻ | | ದಿವಂಗತ |
| भागिनेयः | सहोदरीपुत्रः | അനന്തിരവൾ | Nephew | ಸಹೊದರಿ ಪುತ್ರ |
| मठः | धाम | മഠം | Math | ಧಾಮ |
| मनोगतम् | अभीष्टं | | | ಇಚ್ಛೆ |
| मूषिकः | शिरीषः | ശിരീഷ പുഷ്പം | Flower named shireesha | ಶಿರೀಷ ಹೂ |
| विगतमरण शङ्काः | अपनीय मरणचिन्ता | രണ ഭയമില്ലാത്തവൻ | With out of fear of death | ಸಾವಿನ ಅಂಜದ |
| विमुक्तः | मोक्षः | മോക്ഷം | | ವಿಮೋಚನೆ |
| शिलीमुखः | बाणः | ബാണം വണ്ട് | Arrows | ಬಾಣಗಳು |
| समेत्य | प्राप्य | പ്രാപിച്ച | | ಪ್ರಾಪ್ತ |
| सावत्सरी | संवत्सरं यावत् | ഒരു വർഷം വരെ | Lasting up to one year | ಒಂದು ವರ್ಷದ ವರೆಗೆ |
| स्मरः | कामः | കാമദേവൻ | Cupid | ಕಾಮದೇವ |

# किमधिगतम्

**निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√ ) क्रियताम्**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १ | | | | | |
| २ | | | | | |
| ३ | | | | | |
| ४ | | | | | |
| ५ | | | | | |
| ६ | | | | | |

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।



## आमुखम्

नाटकान्तं कवित्वमित्युक्तिः संस्कृतकाव्यशास्त्रे प्रथिता वर्तते। रूपकादीनां रचनाकौशलं रङ्गप्रयोगे यथा पर्यवसति तथा एव कवेः प्रतिभाविलासः पूर्णता भवति। रूपकाणि संस्कृतकुसुमानां स्तबकरूपेण कल्पयामः।

स्तबकनामके अस्मिन्नेकके कूटियाट्टम् अधिकृत्य विवरणरूपः पाठः **श्लाघ्यं कलापैतृकम्** इति , मृच्छकटिकातः समाकलितः नाटकांशपाठः, **शरणागतरक्षणम्** इति च अत्र समायोजिताः।।



**एककम् ५**

# स्तबकः

**पठनाधिगमाः**

- ☐ कूटियाट्टकलायाः आचार्याणां नामानि लिखति।
- ☐ कञ्चन कूटियाट्टकलाकारं समेत्य अधिककार्याणि ज्ञात्वा टिप्पणीं लिखति।
- ☐ प्रतिलेखमेकमारचयति ।
- ☐ नाटकांशं भावानुसारं वाचयति।
- ☐ नाटकभागं कथारूपेण संक्षिप्य लिखति।
- ☐ नाटकांशं कक्ष्यायां अवतारयति।
- ☐ कथापात्राणां स्वभाववैशिष्ट्यमधिकृत्य चर्चां कृत्वा टिप्पणीं लिखति।
- ☐ रूपकाणां रूपककर्तृणां च नामानि यथोचितं योजयति।
- ☐ सम्बोधनापदानि व्याक्षेपकपदानि च विविच्य ज्ञात्वा लिखति।

**प्रवेशकः** - **केरलीयकलारूपण्यधिकृत्य चर्चित्वा कक्ष्यायाम् अवतारयतु।**




पाठः ११

# श्लाघ्यं कलापैतृकम्।

## पैतृकी कला

लब्धे ई-लेखे दृष्टा जिज्ञासा उचिता एव। एतादृशजिज्ञासया एव अस्माकं बुद्धिः एवम् अनुभवमण्डलानि च प्रवर्धन्ते। भवतः नूतने विद्यालये संस्कृतपठनावसरः न लभते इत्यस्मिन् कार्ये चिन्ता मास्तु। बहुविधाः सुविधाः पठनानुस्यूततार्थं लभन्ते। अधुना भवतः इच्छा कूटियाट्टविषये इत्यतः प्राथमिककार्याणि अत्र सूच्यन्ते। ततोऽधिकं कञ्चन कूटियाट्टकलाकारं साक्षाद्दृष्ट्वा पूर्णतया अवगन्तुं शक्यते।

अधुना विश्वे परिलसितं सजीवञ्च संस्कृतदृश्यकलारूपं भवति कूटियाट्टम्। एषः केरलीयसंस्कृतरूपकाभिनयप्रकारः भवति। क्रिस्तोः पूर्वं प्रायः द्वितीयशतके भवति अस्य प्रादुर्भाव इति केषाञ्चित् विदुषां मतम्। क्रिस्तुवर्षे दशमशतके अधुना दृश्यमानरूपेण कलारूपस्यास्य



परिवर्तनं जातमिति केचन। सहस्राधिकैः वर्षैः जनानां समाजानाञ्च चिन्ता आस्वादनस्तरश्च अनया पोषितः। एवमेवं अधुनापि कलारूपमिदं प्रेक्षकाणां पुरतः अभिनीयते च इत्यस्य माहात्म्यम्। अत एव २००६ तमे वर्षे युनस्को संस्थया विश्वपैतृककलारूपेण कूटियाट्टम् अङ्गीकृतम्। कूटियाट्टमिति कैरलीपदमेव। तस्य मिलित्वा अभिनयः इत्यर्थः। सङ्गीतनृत्ताभिनयानां मेलनमेवात्र प्रचलति। सात्विक -आङ्गिक - वाचिक - आहार्य इति चतुर्विधाभिनयश्चात्र मिलति।

प्रारम्भकाले अस्य रङ्गाविष्कारः महादेवालयेषु विद्यमानेषु नाट्यगृहेषु (कूत्तम्बलेषु) एव आसीत् । भास - कुलशेखर-श्रीहर्ष - नीलकण्ठ - महेन्द्रविक्रम - बोधायन - शक्तिभद्रप्रभृतीनां रूपकाणि अत्र अभिनीयमानानि वर्तन्ते। पूर्वरङ्गक्रियाः, सूत्रधारप्रवेशः, कथापात्रप्रवेशः, निर्वहणं, सरूपकावतारणं, भरतवाक्यं, मुटियक्कित्ता इत्येवम् अभिनयक्रमः भवन्ति । वाद्योपकरणानि तु मिषाव् ,इटक्का, कुषित्तालं, शङ्खः, कुरुङ्कुषल् च भवन्ति। केरलकलामण्डले अस्य शिक्षणावसरः लभ्यते। तदुपरि केन्द्रीयसङ्गीतनाटक अक्कादमि (परिषद्) द्वारा अङ्गीकृतानि अष्टकेन्द्राणि च केरलेषु वर्तन्ते।

केषाञ्चित् विदुषां ई-लेखसङ्केतान् कांश्चन अन्तर्जाल-सङ्केतांश्च आगामिदिने प्रेषयिष्याम्यहम्। पुनरपि भवतां जिज्ञासाभरितं लेखं प्रतीक्ष्य।

सस्नेहं भवदीयः अध्यापकः।



**पदच्छेदाः**

| | |
|---|---|
| इत्यस्मिन् | - इति + अस्मिन् |
| मास्तु | - मा + अस्तु |
| ततोऽधिकम् | - ततः + अधिकम् |
| इत्यतः | - इति + अतः |
| साक्षाद्दृष्ट्वा | - साक्षात् + दृष्ट्वा |
| सजीवञ्च | - सजीवम् + च |
| कलारूपस्यास्य | - कलारूपस्य + अस्य |
| समाजानाञ्च | - समाजानां + च |
| आस्वादनस्तरश्च | - आस्वादनस्तरः + च |
| अधुनापि | - अधुना + अपि |
| इत्यस्य | - इति + अस्य |
| इत्यर्थः | - इति + अर्थः |
| चतुर्विधाभिनयश्चात्र | - चतुर्विधाभिनयः + च + अत्र |
| इत्येवम् | - इति + एवम् |
| प्रेषयिष्याम्यहम् | - प्रेषयिष्यामि + अहम् |
| पुनरपि | - पुनः + अपि |

**विग्रहवाक्यानि**

जिज्ञासा - ज्ञातुम् इच्छा

सजीवम् - जीवेन सह वर्तते इति

धातुपरिचयः

प्रवर्धन्ते - प्र पूर्वक वृधु वृद्धौ आत्मनेपदि लट् प्र पु बहुवचनम्।

## अभिनयक्रमः

**पूर्वरङ्गक्रिया**

कूटियाट्टम् पूर्वरङ्गेणैव आरभते। रङ्गसज्जीकरणानन्तरं शुद्धीकरणं कैरल्यां अरङ्ङुतलि ( അരങ്ങുതളി) इत्युच्यते। तत्र सूत्रधारः दीपाभिमुखं स्थित्वा नान्दीश्लोकं पठति। जलगन्धपुष्पैः आराध्य ब्रह्मदेवमभिवाद्य रङ्गम् अभिवन्द्य नेपथ्यमागच्छति।

**निर्वहणम्**

कथासङ्ग्रहस्य परिचायनम्। (पूर्वकथायाः श्लोकरूपेणावतारणम्)

**भरतवाक्यम्**

संस्कृतरूपकाणामन्ते आयोजितम् आशीश्श्लोकं भवति भरतवाक्यम्।

**मुटियक्कित्ता**

कूटियाट्टम् एकं यज्ञमिति विभाव्य यज्ञेषु कृतसदृशं सर्ववस्तुसमर्पणं भवति मुटियक्कित्ता।

## पठनप्रवर्तनानि

**कूटियाट्टस्य चित्राणि समाहृत्य एकं चित्रपुटं निर्मातु।**

श्रद्धेयांशाः

वैचित्र्यम्।

आकर्षणीयता।

औचित्यम्।

**कञ्चन कूटियाट्टकलाकारं समेत्य अभिभाषणं कृत्वा लघुविवरणं करोतु।**

श्रद्धेयांशौ

आशयव्यक्तता।

समग्रता।

**कूटियाट्टकलायाः आचार्याणां पट्टिकां निर्मातु।**

श्रद्धेयांशाः विषयसंबन्धः औचित्यम्।

**कमपि विषयमधिकृत्य ई-लेखसङ्केतमुपयुज्य मित्रं प्रति लेखमेकं लिखतु।**

श्रद्धेयांशाः

लेखस्य घटना।

समग्रता।

विषयबन्धिता।

## क्रियारूपपरिचयः

प्रेषयिष्यामि - प्र पूर्वक ईष उञ्छे परस्मैपदि लृट् लकारः।

| | | |
|---|---|---|
| प्रेषयिष्यति | प्रेषयिष्यतः | प्रेषयिष्यन्ति |
| प्रेषयिष्यसि | प्रेषयिष्यथः | प्रेषयिष्यथ |
| प्रेषयिष्यामि | प्रेषयिष्यावः | प्रेषयिष्यामः। |

* Kutiyattam - published by Kerala Kalamandalam

चाक्रिकारोहणप्रक्रिया – **कूटियाट्ट-संस्कृतनाटकयोः परस्परसम्बन्धमधिकृत्य चर्चां करोतु।**

पाठः १२

# शरणागतरक्षणम्

कवेः कर्म काव्यम्। तद्विविधं दृश्यश्रव्यत्वभेदेन। कथापात्राणां स्वरूपस्वभावादिकं सर्वं स्वस्मिन्नध्यारोप्य नटः रङ्गे अवतारयति। अत एव तत् रूपकमित्युच्यते।

शूद्रकेण विरचितं भवति मृच्छकटिकम् प्रकरणम्। नाटकमिति सामान्येन व्यवह्रियते चेदपि एतत् प्रकरणलक्षणमावहति। नाटकप्रकरणयोः भेदस्तु अत्यल्पः , अतिसूक्ष्मश्च। नाटकस्येतिवृत्तम् इतिहासोद्भूतं भवति। प्रकरणस्य तु कविकल्पितं च।

उज्जयिन्याः वणिक् चारुदत्तः स्वं सर्वं महादानं कृत्वा दरिद्रीभूतः। तस्य जीवितवर्णनमेव मृच्छकटिकस्य प्रतिपाद्यम्। दशभिः अङ्कैः ग्रथितस्य प्रकरणस्यास्य सप्तमाङ्कात् स्वीकृतम् आर्यकापहरणमेवात्र वर्ण्यते। अत्र चारुदत्तार्यकयोः सौहृदसंभाषणं दृश्यते-

**प्रकरणलक्षणम्**

भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम्।
श्रृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक्।
सापायधर्मकामार्थपरो धीरप्रशान्तकः ।
।। नायिका कुलजा क्वापि वेश्या क्वापि द्वयं क्वचित् ।।

**दशरूपकाणि**

नाटकमथप्रकणं भाणव्यायोगसमवकारडिमः। ईहामृगवीथ्यङ्कप्रहसनमिति रूपकाणि दश।।

(ततः प्रविशति चारुदत्तो विदूषकश्च)

**विदूषकः - भोः ! प्रेक्षस्व, प्रेक्षस्व । पुष्पकरण्डकजीर्णोद्यानस्य सश्रीकताम् ।**

**चारुदत्तः - वयस्य ! एवमेवैतत् - तथाहि -**

**वणिज इव भान्ति तरवः पण्यानीव स्थितानि कुसुमानि।**
**शुल्कमिव साधयन्तो मधुकरपुरुषाः प्रविचरन्ति।।**

**विदूषकः - भोः ! इदम् असंस्काररमणीयं शिलातलम् । उपविशतु भवान्।**

**चारुदत्तः -** (उपविश्य) **वयस्य ! चिरयति वर्धमानकः ।**

**विदूषकः - भणितो मया - " वर्धमानक ! वसन्तसेनां गृहीत्वा लघु लघु आगच्छ " इति।**

**चारुदत्तः - तत् किं चिरयति ?**

---

**पदच्छेदः-** *विदूषकश्च - विदूषकः + च, एवमेवैतत् - एवम् + एव + एतत्, वणिज इव - वणिजः + इव , पण्यानीव - पण्यानि + इव , साधयन्तो मधुकरपुरुषाः - साधयन्तः + मधुकरपुरुषाः ।*

**पदार्थः-** *प्रेक्षस्व = पश्य, जीर्णोद्यानस्य = विशीर्णोद्यानस्य, सश्रीकताम् = शोभाम् , वयस्य = मित्र, असंस्काररमणीयम् = स्वभावतः मनोहरम्, शिलातलम् = प्रस्तरोपरि, लघु लघु = द्रुतम् द्रुतम् , चिरयति = विलम्बते , एवमेवैतत् = वक्ष्यमाणप्रकारेण इत्यर्थः।*

**विग्रहः-** *मधुकरपुरुषाः - मधुकराः पुरुषाः इव ।*
*असंस्काररमणीयम् - संस्कारेण रमणीयम् संस्काररमणीयम् , न संस्काररमणीयम् इति*

| ***अन्वयः*** | ***अन्वयार्थः*** |
|---|---|
| *तरवः वणिज इव* | *वृक्षाः क्रयविक्रेतारः इव व्यापारिवर्गाः)* |
| *भान्ति* | *शोभन्ते / परिलसन्ति* |
| *कुसुमानि पण्यानि इव स्थितानि* | *पुष्पाणि विक्रेयनद्रव्याणि इव विद्यमानानि* |
| *शुल्कं साधयन्त इव प्रविचरन्ति* | *शुल्कग्राहिणः राजपुरुषाः इव भ्रमन्ति।* |
| *मधुकरपुरुषाः* | *भ्रमराः पुरुषाः* |

**भावार्थः-** *नायकः चारुदत्तः वणिक् भवति । अतः सः उद्यानं आपणेन तुलयति । वृक्षाः क्रयविक्रेतारः इव शोभन्ते , पुष्पाणि विक्रेयवस्तूनि इव विराजितानि, मधुग्राहिणः भ्रमराः राजनियुक्ताः शुल्कग्राहिणः पुरुषा इव उद्याने इतस्ततः भ्रमन्ति ।*

**वृत्तम् -** *आर्यावृत्तम्।*

**किं यात्यस्य पुरः शनैः प्रवहणं तस्यान्तरं मार्गते**
**भग्नेऽक्षे परिवर्तनं प्रकुरुते ? छिन्नोऽथवा प्रग्रहः ।**
**वर्त्मान्तोज्झितदारुवारितगतिर्मार्गान्तरं याचते**
**स्वैर्यं प्रेरितगोयुगः किमथवा स्वच्छन्दमागच्छति ।।**

---

**पदच्छेदः-** *यात्यस्य - याति + अस्य, तस्यान्तरम् - तस्य + अन्तरम् , भग्नेऽक्षे - भग्ने + अक्षे, छिन्नोऽथवा - छिन्नः + अथवा , वर्त्मान्तोज्झितदारुवारितगतिर्मार्गान्तरम् - वर्त्मान्तोज्झितदारुवारितगतिः + मार्गान्तरम् ।*

**पदार्थः-** *प्रवहणम् = यानम्। वर्त्म = मार्गः ।*

**विग्रहः-** *वर्त्मान्तोज्झितदारुवारितगतिः - वर्त्मान्ते उज्झितेन दारुणा वारिता गतिः यस्य सः ।*
*प्रेरितगोयुगः - प्रेरितं गोयुगं येन सः।*

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| अस्य पुरः प्रवहणं शनैः याति किम् ? | शकटस्य अग्रे अन्यत् शकटं मन्दं गच्छति किम् ? |
| तस्य अन्तरं मार्गते किम् ? | अग्रगामिनः शकटस्य अवकाशम् अन्विष्यति किम्? |
| अक्षे भग्ने (सति) | कूबरे (यानचक्रे) त्रुटिते (सति) |
| परिवर्तनं प्रकुरुते (किम्) | अन्यचक्रयोजनं करोति किम्? |
| अथवा प्रग्रहः | उत यानवृषभबन्धननियन्त्रणरज्जुः |
| छिन्नः(वा) | त्रुटितः (वा)? |
| अथवा | उत |
| वर्त्मान्तोज्झितदारुवारितगतिः | पतितवृक्षेण अवरुद्धमार्गः |
| मार्गान्तरम् याचते (किम्) | अन्यं पन्थानम् अन्विष्यति (किम्) ? |
| अथवा | वा |
| स्वैरं प्रेरितगोयुगम् | मन्दं सञ्चालितबलीवर्दयुग्मम् । |
| स्वच्छन्दम् आगच्छति किम् ? | यथेच्छम् आयाति किम् ? |

**भावार्थः-** अग्रे शकटं मन्दं मन्दं गच्छति किम् ? अग्रतः गच्छतः शकटान्तरस्य अवकाशम् प्रतीक्षत इत्यर्थः। किं चक्रे खण्डिते सति नवचक्रयोगं विधत्ते ? बलीवर्धरज्जुः त्रुटिता किम् ? अथवा पतितवृक्षेण मार्गः रुद्धः किम्? अथवा ऋषभद्वयं स्वेच्छया आगच्छति किम् ? एषु येनकेनापि कारणेन वर्धमानकागमनं विलम्बते वा इति चारुदत्तः शङ्कते।

**वृत्तम्** - शार्दूलविक्रीडितम् ।

(प्रविश्य गुप्तार्यकप्रवहणस्थः)

**चेटः** - **यातं गावौ ! यातम् ।**

**आर्यकः** - (स्वगतम्)

**नरपतिपुरुषाणां दर्शनाद्भीतभीतः**
**सनिगडचरणत्वात् सावशेषापसारः।**
**अविदितमधिरूढो यामि साधोस्तु याने**
**परभृत इव नीडे रक्षितो वायसीभिः।।**

---

**पदच्छेदः-** *दर्शनाद्भीतभीतः - दर्शनात् + भीतभीतः, साधोस्तु - साधोः + तु, परभृत इव - परभृतः + इव, रक्षितो वायसीभिः - रक्षितः + वायसीभिः, अविदितमधिरूढो यामि - अविदितम् अधिरूढः* + यामि ।

**पदार्थः-** *यातम् = गच्छ इत्यर्थे प्रयोगः, गावौ = ऋषभौ ।*

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| *नरपतिपुरुषाणाम्* | *राजभटानाम्* |
| *दर्शनात् भीतभीतः* | *अवलोकनात् अत्यन्तं त्रस्तः (भीतः)* |
| *सनिगडचरणत्वात्* | *श्रृङ्खलाबद्धपादात्* |
| *सावशेषापसारः* | *मन्दगतिः* |
| *तु* | *किन्तु* |
| *नीडे वायसीभिः* | *कुलाये काकीभिः* |
| *अविदितं रक्षितः* | *अज्ञातं पालितः पोषितश्च* |
| *परभृत इव* | *कोकिल इव* |
| *साधोः याने* | *सज्जनस्य (चारुदत्तस्य) शकटे* |
| *अधिरूढः यामि ।* | *आरूढः (प्रच्छन्नरूपेण स्थितः) गच्छामि।* |

**भावार्थः-** *राजपुरुषाणां निरीक्षणात् सुदूरं गतः स्वेच्छया गन्तुमशक्तः आर्यकः, काकीनां नीडे अतिगूढं पालितः कोकिलशावक इव चारुदत्तयानमारुह्य पलायितः ।*

**वृत्तम्** *मालिनी ।*



अहो ! नगरात् सुदूरमपक्रान्तोऽस्मि। तत् किमस्मात् प्रवहणादवतीर्य वृक्षवाटिकागहनं प्रविशामि? उताहो प्रवहणस्वामिनं पश्यामि। अथवा कृतं वृक्षवाटिकागहनेन । अभ्युपन्नवत्सलः खलु तत्रभवानार्यचारुदत्तः श्रूयते; तत् प्रत्यक्षीकृत्य गच्छामि।

स तावदस्माद्व्यसनार्णवोत्थितं
निरीक्ष्य साधुस्समुपैति निर्वृतिम् ।
शरीरमेतत् गतमीदृशीं दशां
धृतम् मया तस्य महात्मनो गुणैः।।

---

**पदच्छेदः-** *सुदूरमपक्रान्तोऽस्मि - सुदूरम् + अपक्रान्तः + अस्मि, प्रवहणादवतीर्य - प्रवहणात् + अवतीर्य।*

*महात्मनो गुणैः - महात्मनः + गुणैः*

**पदार्थः-** *सुदूरम् =बहुदूरम्, अपक्रान्तः = अपसृतः, वृक्षवाटिकागहनम् = वृक्षसमूहसङ्कुलम्, प्रविशामि = व्रजामि, उत = अथवा, प्रवहणस्वामिनम् = यानस्वामिनम्(चारुदत्तमिति यावत्), अभ्युपपन्नवत्सलः = शरणागतपालकः, प्रत्यक्षीकृत्य = अवलोक्य , गच्छामि (अस्मात् स्थानात् आत्मरक्षार्थम् अन्यत्र गच्छामि)*

**विग्रहः-**

| | | |
|---|---|---|
| *नरपतिपुरुषाणाम्* | - | *नराणां पतिः नरपतिः , नरपतेः पुरुषाः तेषाम्।* |
| *सनिगडचरणत्वात्* | - | *निगडेन सहितौ चरणौ यस्य सः सनिगडचरणः , तस्य भावः , तस्मात् ।* |
| *सावशेषापसारः* | - | *सावशेषः अपसारः यस्य सः ।* |
| *वृक्षवाटिकागहनम्* | - | *वृक्षवाटिकाभिः गहनम् ।* |
| *अभ्युपपन्नवत्सलः* | - | *अभ्युपन्नेषु वत्सलः ।* |
| *व्यसनार्णवोत्थितम्* | - | *व्यसनम् एव अर्णवः , तस्मात् उत्थितः , तम्।* |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| *साधुः सः तावत्* | *चारुदत्ताख्यः सः सज्जनः तावत्* |
| *अस्मात् व्यसनार्णवोत्थितम् (माम्)* | *शरणागतवात्सल्यात् , दुःखसागरात् बहिर्भूतम् (आर्यकम्)* |
| *निरीक्ष्य निर्वृतिम् समुपैति* | *विलोक्य परमानन्दं प्राप्स्यति* |
| *ईदृशीं दशां गतम्* | *पूर्वानुभूताम् अवस्थाम् प्राप्तम्* |
| *एतत् शरीरम्* | *इदं वपुः* |
| *मया तस्य महात्मनः* | *आर्यकेण इत्यर्थः ,महापुरुषस्य (चारुदत्तस्य)* |
| *गुणैः धृतम्* | *परोपकारादिभिः सद्गुणैः त्रातम् ।* |

**भावार्थः-** *महापुरुषस्य तस्य चारुदत्तस्य याने समारोहणेनैव मम (आर्यकस्य) शरीरं एतावत् पर्यन्तं सुरक्षितं वर्तते। अन्यथा राजपुरुषादिभिः गृहीत्वा कारागृहात् बद्धः स्यात् इति भावः।*

**वृत्तम् -** *वंशस्थम्*

चेटः - इदं तदुद्यानम् , तद् यावदुपसर्पामि। (उपसृत्य)आर्य ! मैत्रेय!

विदूषकः - भोः! प्रियं ते निवेदयामि, वर्धमानको मन्त्रयति, आगतया वसन्तसेनया भवितव्यम्।

चारुदत्तः - प्रियं नः प्रियम् ।

विदूषकः - दास्याः पुत्र! किं चिरायितोऽसि?

चेटः - आर्य! मैत्रेय! मा कुप्य, यानास्तरणं विस्मृतमिति कृत्वा गतागतिं कुर्वन् चिरायितोऽस्मि।

चारुदत्तः - वर्धमानक! परिवर्तय प्रवहणम् । सखे! मैत्रेय! अवतारय वसन्तसेनाम् ।

विदूषकः - किं नि गडेन बद्धावस्याः पादौ ? । येन स्वयं नावतरति। न वसन्तसेना, वसन्तसेनः खल्वेषः।

चारुदत्तः - वयस्य ! अलं परिहासेन, न कालमपेक्षते स्नेहः। अथवा स्वयमेवावतारयामि। (इत्युत्तिष्ठति)।

---



**पदच्छेदः-** *वर्धमानको मन्त्रयति - वर्धमानकः + मन्त्रयति, चिरायितोऽसि - चिरायितः + असि, बद्धावस्याः - बद्धौ + अस्याः, नावतारयति - न + अवतारयति , खल्वेषः - खलु + एषः, इत्युत्तिष्ठति - इति + उत्तिष्ठति।*

**पदार्थः-** *उपसर्पामि = समीपमागच्छामि ,मन्त्रयति = वदति, दास्याः पुत्र = धूर्त (निन्दार्थकः प्रोयोगः), चिरायितोऽसि = विलम्बसे, आगतया वसन्तसेनया भवितव्यम् = वसन्तसेना आगता भवेत् इति वर्धमानकः भवन्तम् (चारुदत्तम्) निवेदयति इति भावः, नः = अस्मान् ,मा कुप्य = कोपो मास्तु , यानास्तरणम् = शकटे प्रसारितं वस्त्रम्, गतागतिं कुर्वन् = प्रतिगमनं कृतवान् इत्यतः, परिवर्तय = द्वाराभिमुखं यानं स्थापय, निगडेन = श्रृङ्खलया, बद्धौ = बन्धितौ, अस्याः = वसन्तसेनायाः ,पादौ = चरणौ।*

**विग्रहः-**

*गोपालप्रकृतिः - गोपालः प्रकृतिः यस्य सः।*

**आर्यकः** - (दृष्ट्वा) **अये! अयमेव प्रवहणस्वामी । न केवलं श्रुतिरमणीयो दृष्टिरमणीयोऽपि। हन्त ! रक्षितोऽस्मि।**

**चारुदत्तः** - (प्रवहणमधिरुह्य) **अये ! तत् कोऽयम्? ततः को भवान् ?**

**आर्यकः** - **शरणागतो गोपालप्रकृतिरार्यकोऽस्मि।**

**चारुदत्तः** - **किं घोषादानीय योऽसौ राज्ञा पालकेन बद्धः ?।**

**आर्यकः** - **अथ किम् ।**

---

**पदच्छेदः-** *दृष्टिरमणीयोऽपि - दृष्टिरमणीयः + अपि, कोऽयम् - कः + अयम्, योऽसौ - यः + असौ, गोपालप्रकृतिरार्यकोऽस्मि - गोपालप्रकृतिः + आर्यकः + अस्मि,*



**पदार्थः-** *प्रवहणस्वामी = यानाधिकारी, श्रुतिमनोहरः = श्रवणे रमणीयः, दृष्टिरमणीयः = दर्शने गुणतः स्वरूपतः च रमणीयः इति भावः। रक्षितोऽस्मि = संरक्षितोऽस्मि, अधिरुह्य = अवरोहणं कृत्वा, शरणागतः = अभयं प्राप्तः, गोपालप्रकृतिः = गोपवंशोत्पन्नः (आर्यकः), घोषात् = गृहात्,* गोपालानां वासस्थानात्। धोषः आभीरपल्ली स्यात् पक्कणः शबरालयः इत्यमरः।

**विग्रहः-**

प्रवहणस्वामी - प्रवहणस्य स्वामी ।

श्रुतिरमणीयः - श्रुतौ रमणीयः यः सः

चारुदत्तः - **विधिनैवोपनीतस्त्वं चक्षुर्विषयमागतः।**
**अपि प्राणानहं जह्यां न तु त्वां शरणागतम् ।।**
(आर्यको हर्षं नाटयति)

चारुदत्तः - **वर्धमानक! चरणान्निगडमपनय ।**

चेटः - **यदार्य आज्ञापयति।** (तथा कृत्वा) **आर्य ! अपनीतानि निगडानि ।**

आर्यकः - **स्नेहमयान्यन्यानि दृढतराणि दत्तानि।**

विदूषकः - **सङ्गच्छ निगडानि , एषोऽपि मुक्तः, साम्प्रतं वयं व्रजिष्यामः।**

चारुदत्तः - **धिक् , शान्तम् ।**

आर्यकः - **सखे ! चारुदत्त ! अहमपि प्रणयेनेदं प्रवहणमारूढः । तत् क्षन्तव्यम्।**

---

**पदच्छेदः-** *विधिनैवोपनीतस्त्वम् - विधिना + एव + उपनीतः + त्वम् , प्राणानहम् - प्राणान् + अहम् , चरणान्निगडमपनय - चरणात् + निगडम् अपनय, स्नेहमयान्यन्यानि - स्नेहमयानि + अन्यानि, यदार्य आज्ञापयति - यत् + आर्यः + आज्ञापयति , एषोऽपि - एषः + अपि, प्रणयेनेदम् - प्रणयेन + इदम्।*

**पदार्थः-** अपनय = मोचय, स्नेहमयानि = प्रेमस्वरूपाणि, दृढतराणि = बलवत्तराणि (लोहनिगडापेक्षया अति दृढतराणि इत्यर्थः), संगच्छ = संगतानि कुरु (चारुदत्तस्य चरणे संयोजय), व्रजिष्यामः = गमिष्यामः, (असौ चारुदत्तः एव अत्र प्रेमपाशे बद्धस्तिष्ठतु इति भावः) , धिक् शान्तम् = तादृशं वचः उपसंहर (आर्यकस्य एतादृशि आपत्काले एवंविधा कौतुकोक्तिः नोचिता इति भावः) । प्रणयेन = स्नेहेन ।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| *त्वम्* | *हे आर्यक! इति यावत्।* |
| *विधिना एव उपनीतः (असि)* | *अनुकूलभाग्येन अत्र प्राप्तः (असि)* |
| *चक्षुर्विषयम् आगतः* | *मम दृष्टौ आगतः* |
| *अहम् प्राणान् अपि* | *चारुदत्तः इति अर्थः,(त्वद्रक्षणाय) असून् अपि* |
| *जह्याम्* | *त्यजेयम्* |
| *तु* | *किन्तु* |
| *शरणागतम् त्वाम् न* | *संरक्षणप्रपन्नम् भवन्तम् नैव (जह्यामि त्यर्थः) ।* |

**भावार्थः-** *स्वकीयप्राणत्यागेनापि तव जीवरक्षां करिष्यामि , अतः अकुतोभयं मत्समीपं वस इति चारुदत्तः आर्यकं वदति।*

**वृत्तम्** - *पथ्यावक्त्रम् (अनुष्टुपः भेदः)*

**चारुदत्तः - अलङ्कृतोऽस्मि। स्वयंग्राहप्रणयेन भवता।**

**आर्यकः - अभ्यनुज्ञातो भवता गन्तुमिच्छामि।**

**चारुदत्तः - गम्यताम्।**

**आर्यकः - भवतु , अवतरामि ।**

**चारुदत्तः - सखे नावतरितव्यम् । प्रत्यग्रापनीतसंयमनस्य भवतः अलघुसंवारा गतिः। सुलभपुरुषसञ्चारेऽस्मिन् प्रदेशे प्रवहणं विश्वासमुत्पादयति, तत् प्रवहणेनैव गम्यताम्।**

**आर्यकः - यथाह भवान्।**

---

**पदच्छेदः-** *अलङ्कृतोऽस्मि - अलङ्कृतः + अस्मि, अभ्यनुज्ञातो भवता - अभ्यनुज्ञातः + भवता, सुलभपुरुषसञ्चारेऽस्मिन् - सुलभपुरुषसञ्चारे + अस्मिन् , प्रवहणेनैव - प्रवहणेन + एव, यथाह - यथा + आह ।*

**पदार्थः-** *स्वयंग्राहप्रणयेन = स्वेच्छया एव ग्रहणम्, अलङ्कृतोऽस्मि = सनाथीकृतोऽस्मि, भवता = आर्यकेण, भवता अभ्यनुज्ञातः = भवदनुमतिप्राप्तः , गम्यतां = गन्तुमुद्यतो भव, अवतरामि = गच्छामि, प्रत्यग्रापनीतसंयमनस्य समीपकाले = अपनीतबन्धनयुक्तस्य , भवतः = आर्यकस्येति अर्थः, अलघुसंवारागतिः = प्रयासं विना किञ्चिदपि चलितुं न शक्यते इत्यर्थः, सुलभपुरुषसञ्चारे = जनबाहुल्ययुक्ते, अस्मिन् प्रदेशे = गमनानुकूले देशे, विश्वासमुत्पादयति = जनसमूहसंशयराहित्यं करोति । मम चारुदत्तस्य यानेन भवान् (आर्यक)गच्छति तर्हि जनानां राजपुरुषाणां च संशयलेशः अपि न भवेत् इति भावः । अतः यानेनैव गच्छतु ।*

**विग्रहः-**

| | | |
|---|---|---|
| *प्रत्यग्रापनीतसंयमनस्य* | - | *प्रत्यग्रम् अपनीतः संयमः यस्य , तस्य ।* |
| *अलघुसंवारा* | - | *अलघुः संवारः यस्याः सा ।* |
| *सुलभपुरुषसञ्चारे* | - | *पुरुषाणां सञ्चारः पुरुषसञ्चारः , सुलभः पुरुषसञ्चारः यस्मिन् , तस्मिन्।* |

**चारुदत्तः - क्षेमेण व्रज बान्धवान्, -**
**आर्यकः - ननु मया लब्धो भवान् बान्धवः ;**
**चारुदत्तः - स्मर्तव्योऽस्मि कथान्तरेषु भवता ,**
**आर्यकः - स्वात्मापि विस्मर्यते ?।**
**चारुदत्तः - त्वां रक्षन्तु पथि प्रयान्तममराः,-**
**आर्यकः - संरक्षितोऽहं त्वया,**
**चारुदत्तः - स्वैर्भाग्यैः परिरक्षितोऽसि - ,**
**आर्यकः - ननु हे ! तत्रापि हेतुर्भवान् ।।**
**चारुदत्तः - यत्, उद्यते पालके महती रक्षा न वर्तते, तत् शीघ्रमपक्रामतु भवान् ।**
**आर्यकः - एवं पुनर्दशनाय।** (इति निष्क्रान्तः)

---

**पदच्छेदः-** स्वैर्भाग्यैः - स्वैः + भाग्यैः, हेतुर्भवान् - हेतुः + भवान्।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| बान्धवान् क्षेमेण व्रज | आत्मीयान् आनन्देन गच्छ |
| मया | आर्यकेण इत्यर्थः। |
| भवान् बान्धवः लब्धः ननु | स्निग्धबान्धवः भाग्येन प्राप्तः खलु ? |
| भवता कथान्तरेषु स्मर्तव्यः अस्मि | आर्यकेण सदा स्मरणीयः भवामि। |
| स्वात्मापि विस्मर्यते । | कृतघ्नो न भवामि। |
| अमराः पथि त्वां रक्षन्तु | देवाः मार्गे प्रयान्तं भवन्तं (आर्यकम्) अवन्तु । |
| त्वया अहं संरक्षितः | भवता चारुदत्तेन , अहं(आर्यकः) परित्रातः। |
| स्वैः भाग्यैः परिरक्षितः असि | त्वम् निजैः भाग्यैः परित्रातः असि। |
| ननु हे ! | निश्चयेन हे महात्मन् ! |
| तत्रापि भवान् हेतुः | भाग्यविहितरक्षणेऽपि चारुदत्त एव कारणम्। |

**भावार्थः-** *रक्षकः चारुदत्तः रक्षितः आर्यकः च मिथः एवं स्नेहसम्भाषणं कुरुतः।*

*चारुदत्तः- कुशलेन स्वजनसमीपं गच्छ।* *आर्यकः - भवान् एव मम बन्धुः।*
*चारुदत्तः- आगामिनिषु सुसन्दर्भेषु मां स्मरतु।* *आर्यकः - केन स्वयमेव विस्मर्यते ? ।*
*चारुदत्तः- देवाः मार्गे भवन्तं पालयन्तु।* *आर्यकः - चारुदत्तेन त्वया संरक्षितोऽस्म्यहम् ।*
*चारुदत्तः- निजभागधेयैरेव त्वं रक्षितोऽसि* *आर्यकः - मम भाग्येषु भवानेव कारणम् ।*

**वृत्तम् -** *शार्दूलविक्रीडितम् ।*

पठनप्रवर्तनानि।

**प्रकरणांशं भावानुसारं पठतु ।**

श्रद्धेयाः अंशाः

आशयावगमनम्।

पदच्छेदः।

पदार्थज्ञानम्।

**प्रकरणांशं पठित्वा कथारूपेण संक्षिप्य लिखतु ।**

श्रद्धेयाः अंशाः

आशयसंग्रहः ।

उचितपदस्वीकारः ।

भाषाशुद्धिः ।

कथाशैली

**प्रकरणांशं सम्यक् पठित्वा संबोधनारूपाणि , व्याक्षेपकाव्ययानि च चित्वा लिखतु ।**

श्रद्धेयाः अंशाः

सम्बोधनापरिचयः ।

व्याक्षेपकाव्ययपरिचयः ।

चयनसामर्थ्यम्।

**अधोदत्तानि अव्ययानि पट्टिकां करोतु ।**

श्रद्धेयौ अंशौ

अव्ययज्ञानम्

पट्टिकाकरणसामर्थ्यम्।

उपविश्य , अवतीर्य, गन्तुं , प्रत्यक्षीकृत्य, गृहीत्वा, निरीक्ष्य , आनीय, कृत्वा, उत्थाय

| क्त्वान्तम् | तुमुन्नन्तम् | ल्यबन्तम् |
| --- | --- | --- |
| | | |

**ग्रन्थानां ग्रन्थकर्तॄणां च यथोचितं पट्टिकां कुरुत ।**

श्रद्धेयाः अंशाः

नाटककाराणां परिचयः ।

नाटकानां परिचयः ।

पट्टिकाकरणसामर्थ्यम्।

| ( कालिदासः , उत्तररामचरितम्, मृच्छकटिकम्, भवभूतिः, स्वप्नवासवदत्तम्, शूद्रकः, अभिज्ञानशाकुन्तलम्, आश्चर्यचूडामणिः, भासः , शक्तिभद्रः) | |
|---|---|
| **ग्रन्थः** | **ग्रन्थकर्ता** |
| | |

**प्रकरणांशं व्याक्षेपकाव्ययानि च चित्वा लिखतु**

श्रद्धेयाः अंशाः

## व्याकरणविशेषः -

दर्शनात् भीतभीतः - भीत्रार्थानां भयहेतुः इत्यनेन पञ्चमीविभक्तिः ।

अलं परिहासेन - निषेधार्थकस्य अलम् इत्यस्य योगे तृतीयाविभक्तिः।

दैत्येभ्यः हरिः अलं - पर्याप्त्यर्थस्य अलम् इत्यस्य योगे चतुर्थी।

## वृत्तपरिचयः

मालिनी - ननमयययुतेयं मालिनी भोगिलोकैः ।

| | | |
|---|---|---|
| वंशस्थम् | - | जतौ तु वंशस्थमुदीरितं जरौ । |
| शार्दूलविक्रीडितम् | - | सूर्याश्वैर्मसजस्ततो सगुरवः शार्दूलविक्रीडितम् |
| पथ्यावक्त्रं | - | युजोर्जेनसरिद्भर्तुः<br>पथ्यावक्त्रं प्रकीर्तितम् । |
| वक्त्रम् | - | वक्त्रं नाद्यान्नसौ स्याताम् । अब्धेर्योऽनुष्टुभिः ख्यातम् ।। |
| आर्या | - | यस्याः प्रथमे पादे द्वादशमात्राः तथा तृतीयेऽपि ।<br>अष्टादश द्वितीये चतुर्थके पञ्चदश साऽर्या।। |

जह्यां -'ओहाक् त्यागे'- विधिलिङ् परस्मैपदि उ.पु.ए.व।

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम** |
|---|---|---|---|
| **प्र-पु** | जह्यात् | जह्यातां | जह्युः |
| **म-पु** | जह्याः | जह्यातं | जह्यात |
| **उ-पु** | जह्यां | जह्याव | जह्याम |

## शब्दकोशः

| | | | | |
|---|---|---|---|---|
| अधिरुह्य | आरुह्य | കയറിയിട്ട് | Having climbed | ಆರೋಹಣ |
| अनुस्यूतता | निरन्तरं | തുടർച്ച | Countinuity | ನಿರಂತರ |
| इ-लेखनम् | ई-मेयिल् | ഇ - മെയിൽ | E - mail | ಇ ಮೆಯಿಲ್ |
| चक्षुर्विषयः | दृष्टिविषयः | ദൃഷ്ടി വിഷയമായത് | Visible | ಕಾಣುವ |
| जिज्ञासा | ज्ञातुम् इच्छा | അറിയാനുള്ള ഉത്കണ്ഠ | Eagerness to know | ತಿಳಿಯುವ ಕುತೂಹಲ |
| नाट्यगृहम् | नाट्यशाला | | | ವೇದಿಕೆ |
| दृष्टिरमणीयः | दर्शनीयः | സുന്ദരൻ | Handsome | ಸುಂದರವಾದ |
| परिलसितम् | शोभितम् | ശോഭിച്ചത് | Shining | ಶೋಭಿಸುವುದು |
| पैतृककला | पारम्पर्यकला | പാരമ്പര്യകല | Heredictory art | ಪರಂಪರಾಗತ ಕಲೆ |
| प्रग्रहः | वृषभाश्वनि | | | |
| | यन्त्रणरज्जुः | കടിഞ്ഞാൺ | Rein | ನಿಯಂತ್ರಣ |
| प्राणान् | असून् | ജീവൻ | soul | ಜೀವ |
| प्रादुर्भावः | आविर्भावः | പ്രത്യക്ഷപ്പെടൽ | Appearance | ಬಾಹ್ಯಚಹನೆ / ನೋಟ |
| मुक्तः | मोचितः | മോചിക്കപ്പെട്ടു | Released | ಬಿಡುಗಡೆಯಾದ |
| विधिना | भाग्येन | ഭാഗ്യം കൊണ്ട് | Fortune | ಬಾಗ್ಯದಿಂದ |
| क्षन्तन्यम् | क्षन्तुं योग्यम् | ക്ഷമിക്കുന്നതിന് | | |
| | | യോഗ്യമായത് | To endurable | ಸಹನಯೋಗ್ಯ |

## अभ्यासपत्रिका -५

१ यथोचितं योजयत।

कथाकेलिः - नङ्यार्।

कूटियाट्टम् - कन्नटसाहित्यम्।

ओट्टन्तुल्लल्- आट्टक्कथासाहित्यम्।

चाक्यार्कूत्त् - संस्कृतनाटकसाहित्यम्।

यक्षगानम् - शीतङ्कन्।

२ सूचनानुसारं कथापात्रस्वभावं लिखत।

सूचना

दानकर्मणा दरिद्रः वणिक् - परोपाकारतत्परः - वसन्तसेना- आर्यकः - शरणागतरक्षणम् - उत्तमसौहृदः।।

३. कूटियाट्टम् इति कलारूपस्य वैशिष्ट्यमधिकृत्य सूचनानुसारं लघुटिप्पणीं लिखत।

सूचना

- संस्कृतरूपकस्य दृश्याविष्कारः।
- प्राचीनकलारूपम्।
- केरलेषु प्रचलति।
- युनेस्को संस्थायाः अङ्गीकारः।

४ नाटकम् , महाकाव्यम् इति विविच्य पट्टिकां करोतु।

| | | | |
|---|---|---|---|
| स्वप्नवासवदत्तम् | रघुवंशम् | किरातार्जुनीयम् | अभिज्ञानशाकुन्तलम् |
| प्रतिमानाटकम् | कुमारसम्भवम् | कर्णभारम् | शिशुपालवधम् |
| उत्तररामचरितम् | मृच्छकटिकम् | आश्चर्यचूडामणिः | |

# किमधिगतम्

**निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√ ) क्रियताम्**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १ | | | | | |
| २ | | | | | |
| ३ | | | | | |
| ४ | | | | | |
| ५ | | | | | |
| ६ | | | | | |

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।

टिप्पणीलेखनपुटम् ।(Notes)

टिप्पणीलेखनपुटम् ।(Notes)